नेयार्थमथ गूढार्थमप्रतीतमवाचकम् ॥ ३ ॥

देश्यं विशेषणापेक्षमक्षमार्थान्तरं तथा ।
कष्टं पर्यायविज्ञेयं छन्नस्वार्थं ततः परम् ॥ ४ ॥

---

१ B. मध्यमाध्यमयो०

२ A. मनीषिः changed to मनीषिभिः; B मनीषिः.

३ B. भीमार०

४ A. जीवनरेन्द्र changed to जीवनेन्द्र.

विरुद्धार्थान्तरं तद्वद्विरुद्धं ग्राम्यमित्यपि ।

अथ[1] **विशेषणपदानि**

विशेषणं प्रतीतार्थमसामर्थ्याभिधायि च ॥ ५ ॥
हेत्वपेक्षमसम्भाव्यार्थकं चैवाऽप्रयोजनम् ।
हीनार्थमधिकार्थं च समयन्यूनमेव च ॥ ६ ॥
विरोधोद्भावि चैतेषां[2] सलक्ष्यं लक्ष्म कथ्यते ।
**अपभ्रष्ट**मसाधु स्याच्छब्दशास्त्रविरोधि यत् ॥ ७ ॥
यथा बाधति शीतांशुर्वियोगार्ता करैरिमैः ।

अत्र '**न तं बाधन्ति भूतानि**', '**स्तुवीत चरितैरिमै**' रित्यादि**पुराण**प्रयोगमवलोक्य बाधत एभिरिति[3] प्रयोक्तव्ये शब्दशास्त्रविरोधि 'बाधति' 'इमै'रिति च प्रयुक्तम् । त**दपभ्रष्ट**मपशब्दितमिति ॥

यत्तु तुच्छाभिधानं स्या**दपुष्टार्थं** तदुच्यते ॥ ८ ॥
यथाऽयं षोडशार्धार्धवदनः श्रेयसेऽस्तु वः ।

अत्र '**चतुर्मुख**' एतावति वाच्ये '**षोडशार्धार्धवदन**' इति पदं तुच्छार्थम् ।

**तदप्रयुक्तं** यत्साद्भिः प्रयुक्तं नैव साध्वपि ॥ ९ ॥

**यथा**

नहीदमन्यत्र विभावयामः सौरभ्यमाह्लादकरं च रूपम् ।
इतीव गुञ्जारवकैतवेन पद्मानवाप्य भ्रमरा वचन्ति ॥ १० ॥

अत्र 'वा पुंसि पद्मं नलिनम् (ना. अ. १-१०-३९)' इति पुल्लिङ्गेऽप्यनुज्ञातमपि शिष्टैः काव्यादौ न प्रयुक्तम् । तथा च प्रकृतिप्रत्यय[4]विभागात्सुसिद्धमपि न हि वचिरान्तिपरः प्रयोगार्ह इति **वचान्ति**पदमप्रयुक्तम् । तस्मात् 'पद्मान्यवाप्य भ्रमरा वदन्ती'ति युक्तः पाठः ।

सम्बन्धिनि यदेकत्र रूढमन्यत्र योजितम् ।
यत्स्याद्विरुद्धसम्बन्धि[5] **विसम्बन्धं** तदुच्यते ॥ ११ ॥

---

१ B. अपि
२ B. चैतैषां
३ A. एभिसिरिति corrected by Sec. m. B. एभिरिरिति.
४ प्रतिप्रत्यय A. cor. sec. m. B. प्रतिप्रत्यय.
५ B. संबं*.

यथा

हयबृंहितेन गजहेषया तथा भटवासितेन मुखरीकृता दिशः ।

अत्र गजानां बृंहितं, हयानां हेषा, तिरश्चां वासितमिति रूढसम्बन्धानि पदान्यन्यसम्बन्धाद्विरुद्धसम्बन्धानि ।

वाञ्छितार्थादपेतं यद**पेतार्थं** तदुच्यते ।
अन्यार्थमर्थहीनं चेत्यस्य **भेदद्वयं** विदुः ॥ १२ ॥

यथा

हिरण्यपूर्वं कशिपुं विदार्य नृहरिर्नखैः ।
दैतेयवर्गं तरसा भपूर्वं यमलम्भयत् ॥ १३ ॥

अत्र '**हिरण्य**' **पूर्वं** '**कशिपु**' **मि**ति सुवर्णकौपीनाभिधेयतयाऽन्यार्थत्वेन दैत्यलक्षणाद्वाञ्छितार्थादपेतत्वम् ।[१] तथा च '**भ**' **पूर्वं** '**य**'मिति केवलमर्थहीनमक्षरद्वयमवसितं न[२] तद्वाच्योऽर्थः । तस्माद्रीतिलक्षणाद्वाञ्छितार्थादपेतामि**त्यपेतार्थम्** ॥

प्रकृत्यादिविभागेन यत्क्लेशादवगम्यते ।
त**त्परिक्लिष्ट**मित्युक्तं यथा प्रागादरिस्तव ॥ १४ ॥

अत्र प्रपूर्वस्येणो[३] लुङि गादेशे कृते **प्रागादि**ति सिद्धस्य पदस्य मरणार्थता क्लेशेनावगम्यते ।

पादपूरणमात्रं यत्प्रयुक्तं त**दनर्थकम्** ।
यथा वन्दे हि देवस्य पादौ द्वौ च शिवस्य नु ॥ १५ ॥

अत्र ह्यादीनि पादपूरणमात्रार्थानि । तथा पादाविति द्विवचनेनैव द्वित्वेऽवगम्यमाने द्वाविति **चानर्थकम्** ॥

क्रिया[४]दिकमुपादाय निमित्तं यत्प्रवर्त्यते ।
अर्थान्तरेऽपि सन्दिग्धं त**त्सन्दिग्ध**मुदाहृतम् ॥ १६ ॥
सञ्ज्ञात्वेनैव तन्मोहात्प्रयुक्तं दूष्यते बुधैः ।
विशेषणतया साधु हिमहेतिरवौ यथा ॥ १७ ॥

---

१ After this B wrongly inserts 'तथा च भपूर्वं यमिति केवलमर्थत्वेन दैत्यलक्षणाद्वाञ्छितार्थादपेतत्वं.'

२ B. After न, च crossed.

३ A. पूर्वस्येणो cor. sec. m. B. पूर्वस्येणो.

४ A. क्रियाया. cor. sec m. B. क्रियाया.

इदं तु **हिमहोति**पदमर्थान्तरे वह्नावपि सन्देह[1]मुत्पाद्योष्णवीर्यस्य द्रव्यान्तरस्य गमकमिति सर्वत्र **सन्दिग्धम्** ॥

यन्मतं नैव[2] लोकानां प्रयुक्तं न च भूयसा ।
**अप्रसिद्धं** तदत्रोक्तं तरीतर्तिपदं यथा ॥ १७ ॥

यथा भोभवीतिवावदीत्यादि भूयसा प्रयुज्यते, तथा **तरीतर्ती**ति न प्रयुज्यते। लोकप्रसिद्धं न भवतीत्य**प्रसिद्धम्** ॥

प्रकृत्यादिविभागेन यस्यार्थो नाऽवगम्यते ।
त**द्दुर्बोध**मिति प्रोक्तं कुकीलादिपदं यथा ॥ १९ ॥

कुकील: पर्वतः । **आदि**शब्दादाजवञ्ज्यवादि । आजवञ्ज्यवः संसारः ॥

प्रसिद्धया स्थगितेऽर्थे यत्प्रयुक्तं **रूढिबाधितम्** ।
उच्यते गच्छतीत्यर्थे खेलतीति पदं यथा ॥ २० ॥ स्पष्टम् ॥

स्वसङ्केतप्रकॢप्तार्थं **नेयार्थं** तन्निगद्यते ।
यथा विषधराहारतनयोऽब्धिमलङ्घयत् ॥ २१ ॥

विषधरो भुजङ्गः, तस्याहारो वायुः, तस्य तनयो हनूमानिति स्वसङ्केतकॢप्तार्थत्वम् ॥

प्रयुक्तमप्रसिद्धेऽर्थे यदनेकार्थकं पदम् ।
**तद्गूढार्थं** यथा हेतिर्भिनत्त्यद्रिं सहस्रगोः ॥ २२ ॥

अत्र सहस्रगोरिति गोशब्दोऽनेकार्थोऽप्रसिद्धे नेत्रार्थे प्रयुक्तः ॥

शास्त्र एव प्रतीतं **यदप्रतीतं** तदुच्यते ।

यथा

मनुः स एव भूपानां यो द्यूनाङ्गसमृद्धिदः ॥ २३ ॥

अत्र **मनु**शब्दो मन्त्रवचन **आगम**शास्त्रे प्रसिद्धस्तथा **द्यून**शब्दः सप्तसङ्ख्यालक्षको **ज्योतिःशास्त्र** एव न काव्यादावित्य**प्रतीतम्** ॥

वाचकत्वमनादृत्य व्युत्पत्त्यैव[3] प्रयुज्यते ।
त**दवाचक**मित्युक्तं यथा वर्षति वारिधिः ॥ २४ ॥

अत्र वारि धीयतेऽस्मिन्निति व्युत्पत्त्या **वारिधि**शब्दो मेघवाचको विहितः ॥

---

१ B. संदहसंदेह (sic).

२ A. नैति.

३ B. विव्युत्प.

देश्यं तदिति निर्दिश्यं यदव्युत्पत्तिमत्पदम् ।
यथा लावण्यतल्लौ ते गल्लौ बाल[1]मृगेक्षणे ॥ २५ ॥

तल्लादिशब्दानामव्युत्पन्नत्वाद्देश्यत्वम् ॥

तत्स्याद्विशेषणापेक्षं यद्वाञ्छति विशेषणम् ।
यथेयं सुकुमाराङ्गी चक्षुषा मां विलोकते ॥ २६ ॥

अत्र विलोकत इत्येतावतैव सिद्धे चक्षुषेति पदमप्रयोजनं प्रयुक्तं, तच्च किञ्चिल्लज्जालोलेनेत्यादि विशेषण[2]मपेक्षते ॥

अक्षमार्थान्तरं तत्स्याद्यस्यार्थान्तरमक्षमम् ।
यथा पतङ्गो ज्वलितं हन्तु तेजोऽरिभूभुजाम् ॥ २७ ॥

अत्र पतङ्गशब्दस्यार्थान्तरं कीटपक्षिविशेषः । स तु प्रत्युत तेजसा हन्यत इत्यक्षमार्थान्तरम् ॥

कर्कशत्वाद्दुरुच्चारं पदं कष्टमितीरितम् ।
यथा वर्त्र्ष्टि[3] जलदश्चातकैरभिनन्दितः ॥ २८ ॥

वर्त्र्ष्टीति कर्कशाक्षरतया दुरुच्चारता ॥

सञ्ज्ञाशब्दस्य पर्यायैरेकानेकार्थवर्तिभिः ।
कल्पितं यत्पदं तत्तु पर्यायज्ञेयमुच्यते ॥ २९ ॥

यथा,

अश्वकान्तानलेनायं पीयते नित्यमम्बुधिः ।
निवसन्नपि तत्रैव क्षौद्रारिस्तं न रक्षति ॥ ३० ॥

अत्र वडवाशब्दस्याश्वकान्ताशब्द एकार्थवृत्तिः । तथा दैत्यवाचिनो मधुशब्दस्य क्षौद्रशब्दोऽभिन्नार्थवृत्तिः पर्यायः ॥

यमर्थं कुरुते स्वीयं प्रकृतिः प्रादियोगतः ।
स च्छन्नो दृश्यते यत्र च्छन्नस्वार्थं तदुच्यते ॥ ३१ ॥

यथा,

आवहन्त्यधिकसञ्ज्वरं मुहुः प्रस्मृतप्रियसमागमोत्सवा ।
अङ्गणे शशिनमेक्ष्य कम्पिता संविवेश भवनं वियोगिनी ॥ ३२ ॥

---

१ A. बोल changed to बाल. B. बोल.

२ A. विशेष corr. Sec. m. B. विशेष.

३ B. वर्त्टि.

अत्राङ्पूर्वस्य वहतेः कृतिः, प्रपूर्वस्य स्मरतेर्विस्मृतिः, सम्पूर्वस्य विशेः सुप्तिः स्वार्थः सञ्छन्न इति **छन्नस्वार्थता** ॥

यस्यार्थोऽन्यो विरुद्धः स्या**द्विरुद्धार्थान्तरं** हि तत् ।
यथाऽनन्दाय जगतो विषं यच्छति वारिदः ॥ ३३ ॥

अत्र[1] 'जीवनीयं कुशं विष'मिति नाम(नामानु)शासनाद्विषशब्दो जलवचनस्तस्यान्योऽर्थो गरलक्षणः । स च प्रकृते विरुद्ध इति **विरुद्धार्थान्तरम्** ॥

त**द्विरुद्धं** प्रस्तुतेन यस्य योगो विरुध्यते ।
यथा तनोतु वः कामं कामशत्रुर्निरन्तरम् ॥ ३४ ॥

अत्र **कामशत्रु**रित्यस्य योगः कामं तनोत्वित्यनेन प्रकृतेन विरुद्धः ॥

सघृणाऽमङ्गलाऽसभ्याः वाच्या अर्थान्तराणि वा ।
स्मार्या वा यस्य जायन्ते **तद्ग्राम्य**मभिधीयते ॥ ३५ ॥

**सघृणा**दीनां वाचकं यथा—

लालाक्लिन्नमुखी सुप्ता मृतेवेयमचेतना ।
नग्ना प्रथयति स्पष्टं नारी मद्यविचेष्टितम्[2] ॥ ३६ ॥

अत्र लालेति जुगुप्सितस्य, मृतेत्यमङ्गलस्य, नग्नेत्यसभ्यस्य वाचकम् ।

**अर्थान्तरं** यथा

वर्चोयुतं कथमधो वदनं विधाय
त्वं संस्थिताऽसि दयिते मृगशावकाक्षि ।
गुह्यं निजं प्रकटय द्रविणेन गुह्य-
केशोऽस्मि तेऽभिलषितं परिपूरयामि ॥ ३७ ॥

अत्र तेजोवाचिनो **वर्चः**शब्द**स्यार्थान्तरं** विष्ठेति **सघृणार्थान्तरम्**। तथा 'संस्था च मर्यादा धारणा स्थिति'रित्यमरः[का. २-८-२६]। संस्था जाता यस्या इति संस्थिता धारणावतीति मुख्योऽर्थः। त**स्याऽर्थान्तरं** मृतेति । शावकेत्य**स्यार्थान्तरं** प्रेतेति चा**मङ्गलार्थान्तरम्** । तथा गुह्यमाकूतवाचि । त**स्यार्थान्तरं** भगः । गुह्यकानामीश इति कुबेराभिधेयस्य गुह्यकेशपदस्यार्थान्तरं कुत्सितकेश इति **चासभ्यार्थान्तरम्** ॥ [[3]इति] सघृणाऽमङ्गलाऽसभ्यार्थान्तरम् ॥

---

१ Both read अ. But in A त्र is written on margin by Sec. m.

२ B. मद्यवचेष्टितं. B. Above द्य, घ is written by Sec. m. and changed to मद्यविचेष्टितं.

३ B. omits this sentence.

**सघृणाऽमङ्गलाऽसभ्यानां स्मारकं** यथा

सलिलेन पूयमाना मज्जनतो मानिनस्तपस्यन्ति ।
आप्तुमभिप्रेतफलं[1] विपिने शेफालिकाकुलिते ॥ ३८ ॥

अत्र पूयेति मज्जेति चैकदेशोल्लेखात्**सघृणस्मारकम्** । अभिप्रेतेत्य**मङ्गलस्मारकम्** । तथा शे[2]फालिकेत्य**सभ्यस्मारकम्** ॥ छ ॥

अथ **विशेषणपददोषा:** ॥

विशेष्यस्य[4] गुणं नित्याऽव्यभिचारितयैव यत् ।
प्रतीतं वक्ति तत्प्राहुः **प्रतीतार्थं** विशेषणम् ॥ ३९ ॥

यथा

दधतं विलुलितवालं भाले कालं मषी[5]तिलकम् ।
सहसा हसितरसालं गोकुलबालं हृदा कलये ॥ ४० ॥

अत्र कालमिति **प्रतीतार्थम्** ॥

विशेष्ये वक्तयशक्तिं **यदसामर्थ्याभिधायि** तत्[6] ।
यथा विधुन्तुदग्रस्तः क्लेशं हरतु वो विधुः ॥ ४१ ॥

अत्र **विधुन्तुदग्रस्त** इति विशेषणं विशेष्ये चन्द्रेऽसामर्थ्यमभिव्यक्त इत्य**सामर्थ्याभिधायि** ॥ छ ॥

हेतुं मृगयते यत्तद्**धेत्वपेक्ष**मुदीरितम् ।
यथोद्धृता वराहेण लोहितादुदधे[7]र्मही ॥ ४२ ॥

अत्र **लोहिता**दिति विशेषणं हेतुमपेक्षते ॥

असम्भाव्यो यदर्थः स्याद**सम्भाव्यार्थकं** हि तत् ।

यथा

श्रूयते वज्रनिर्घोष उच्चैः श्रोत्रसुखावहः ॥ ४३ ॥

अत्र श्रोत्रसुखावह इति विशेषणं वज्रनिर्घोषेऽ**सम्भाव्यार्थकम्** ॥

---

१ A. ०पलं.

२ B. सेफा०.

३ Both सेफा०

४ B. विशेषस्य.

५ Both read मखी०. But A. changes खी into षी by sign. In both occasionally ख is used in place of ष.

६ B. यत्.

७ B. उददेर्.

प्रस्तुतार्थोपयोगित्वशून्यं[1] स्यादप्रयोजनम् ।
यथेन्दुं शिरसा[2] धत्ते हरः कुमुदवान्धवम् ॥
यथा वा हनुमानब्धिं मीनवन्तमलङ्घयत् ॥ ४४ ॥

अत्र **कुमुदवान्धवं मीनवन्त**मिति विशेषणयोः प्रस्तुतार्थोपयोगशून्यत्वा**दप्रयोजनता** ॥

हीनं वाऽविकमप्यर्थं **विशेष्यापेक्ष**माह यत् ।
हीनार्थमधिकार्थं च प्रोच्यते तद्विशेषणम् ॥ ४५ ॥

**यथा**

निष्प्रभीकृतखद्योतो[3] भानुमानुदयं गतः ।
आदित्यमण्डलोद्योतः खद्योतोऽयं विराजते ॥ ४६ ॥

स्पष्टम् ॥

कविसङ्केतरहितं **समयन्यून**मुच्यते ।
यथा श्यामः शरन्मेघश्चन्दनः फलपुष्पवान् ॥ ४७ ॥

अशोकवृक्षः फलितः पाटलः कुन्दकुड्मलः ।
दिवा विकाशि नीलाब्जं भृङ्गश्चम्पकचुम्बकः ॥ ४८ ॥

**कविसङ्केतरहितमि**त्यादि स्वयमु (मू)ह्यताम् ।
उद्भावयेद्विरोधं **यद्विरोधोद्भावि** तन्मतम् ॥ ४९ ॥

विरोध आगमे लोके देशे काले कलास्वपि ।
प्रसिद्धस्यान्यथैवोक्तिस्तत्रोदाहृतयो यथा ॥ ५० ॥

आगमविरुद्धेषु **स्मृतिविरुद्धं** यथा

निर्निमित्तं परित्यक्तषट्कर्मा श्रोत्रियः शुचिः ।

**तर्कविरुद्धं** यथा

यथार्थानुभवादन्या प्रमा सेयं ममोदिता ॥ ५१ ॥

**वेदान्तविरुद्धं** यथा

आत्मसाक्षात्कृतिः स्वच्छो भेददृष्टिर्यतीश्वरः ।

---

१ Both ०सून्यं.

२ Both सिरसा. But in A. सि is changed to शि by sign.

३ Both षद्योतो. But in A. ष is changed to ख by sign.

**भाट्टविरुद्धं** यथा

यागोत्पन्नस्य पुण्यस्याऽपूर्वशक्त्याऽभिनन्दिता[१] ॥
सा देवता विग्रह(हि)णी फलदात्री भविष्यति ॥ ५२ ॥

**जैमिनि**मते विग्रह(हि)णी देवतेति विरुद्धम् ॥

**लोकविरुद्धं** यथा

शण्ढः प्रौढाङ्गनासङ्गरतिसन्तोषदायकः ।
सटाकरालो द्विरदो निःसारः खदिरद्रुमः[२] ॥ ५३ ॥

**देशविरुद्धं** यथा

भूर्जपत्रपरीधाना मलये भिल्लयोषितः ।
मदान्धकुञ्जराकीर्णा सेयं मरुवनस्थली ॥ ५४ ॥

कस्तूरीमृगसम्पन्नाः कावेरीतीरभूमयः ।

**कालविरुद्धं** यथा

मधुरुत्फुल्ल[३]निचुलः श[४]रन्मत्तमयूरिका ॥ ५५ ॥

**कलाविरुद्धं** यथा

नट्टां पञ्चस्वरां प्रातर्गानयोग्यां शृणु प्रभो ।

नट्टारागस्य[५] पञ्चस्वरत्वं प्रातर्गानोचितत्वं च विरुद्धम् ॥

एकतन्त्रीयुता सेयं विभाति पर(रि)वादिनी ॥ ५६ ॥

तन्त्रीसप्तकबद्धायाः पर(रि)वादिन्या एकतन्त्रीयुतत्वं विरुद्धम् ॥

**ज्योतिषविरुद्धं** यथा

विवाहलग्ने सर्वेऽपि सप्तमस्था ग्रहाः शुभाः ।

अशुभा हि विवाहलग्ने सप्तमस्थानस्था ग्रहास्तद्विपरीतमुक्तमिति[६] विरुद्धम् ॥

**वैद्यकविरुद्धं** यथा

---

१ Both नंता. But, in A. दि is written on margin.

२ B. ०द्दमः.

३ A. मधुरत्फुल्ल-

४ Both read सरन्मत्त०. But; स is changed to श by sign in A.

५ B. निद्रारागस्य.

६ B. ०मुक्तविति.

ताम्बूलपूर्णवदनो नित्योत्कुपितलोचनः ॥
शीतवीर्यस्य मत्स्यस्याभ्यवहारेण पुष्टिमान् ॥ ५७ ॥

नेत्ररोगिणस्ताम्बूलं मत्स्यानां शीतत्वं च **वैद्यकमतविरुद्धत्वाद्विरुद्धम्** ॥

**दोषा** एते समाख्याता मया पदसमाश्रयाः ।
अनेनैव प्रकारेण परेऽप्यूह्या विचक्षणैः ॥ ५८ ॥

पदानि स्वल्पदोषानि(णि) प्रयुञ्ज्याद्यमकादिषु ।
नापभ्रष्टं पदं क्वापि प्रायोऽनुकरणं विना ॥ ५९ ॥

विरुद्धं तु विरोधादौ विरोध्यर्थान्तरं[1] तथा ।
कविना कौशलन्यस्तं साधुत्वमुपगच्छति ॥ ६० ॥ छ ॥

इति श्रीमालकुल-श्रीमालभार-मालवमण्डलालङ्कार-**जीवनेन्द्र**नन्दन-मफरलमलिक-**श्रीपुञ्जराजविरचिते शिशुप्रबोधे काव्यालङ्कारे शब्ददोषनिरूपणं** नाम **द्वितीयोऽध्यायः** ॥ छ ॥[2]

## [ अथ तृतीयोऽध्यायः ]

अथ **वाक्यदोषाः** ।

शब्दहीनं क्रमभ्रष्टं व्याकीर्णं पुनरुक्तिमत् ।
वाक्यगर्भमपुष्टार्थमतिरिक्तपदं तथा ॥ १ ॥

हीनं पदान्तराकीर्णं विसन्धि श्रुतिकर्कशम् ।
अवाचकं भग्नवृत्तं भग्नरीति यतिच्युतम् ॥ २ ॥

ग्राम्यमेते **षोडशोक्ता दोषा** वाक्यसमाश्रयाः ।
यदुपेत्य सुशब्दोऽपि नूनं धत्तेऽपशब्दताम् ॥ ३ ॥

तच्**छब्दहीन**माख्यातं प्रयोगेष्वतिगर्हितम् ।
यथा पादेन हनुमानाजघ्न रावणात्मजम् ॥ ४ ॥

क्रोधेन मूर्छितोऽप्येष मूर्छामुच्चैरविन्दत ।

'आङो यमहन' [ अष्टा. १-२-२८ ] इति हन्तेरात्मनेपदविधान 'आत्माङ्गकर्मकाभ्यां चे'त्युक्तत्वाद्धनूमानाजघ्ने रावणात्मजमिति वाक्य **आजघ्न** इति सुशब्दोऽप्यपशब्दतामुपैति । अयं तु **वाक्यदोषः** । न तु पदस्य ॥

---

१ B. विसध्यर्था०- A. originally विसधार्था० and changed to विरोध्यर्था० by Sec. m.

२ After this श्री. in A. शुभं भवतु in B.

तदुच्यते **क्रमभ्रष्टं** यत्पदार्थक्रमोज्झितम् ॥ ५ ॥

यथा

देवं गन्धर्वं वा मनुजं वा निर्जयामि रणे ।
क्षेत्रं वा ग्रामं वा[१] देशं वा देहि मे तस्मात् ॥ ६ ॥

अत्र मनुजं गन्धर्वं देवं तथा देशं ग्रामं क्षेत्रं वेति क्रमस्तेनोज्झितत्वम् ।

यथा वा

स्वयंविशीर्णद्रुमपर्णवृत्तिता
पर हि काष्टा(ष्ठा) तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णामिति तां पुराविदः ॥ ७ ॥

[कु. सं. स. ५ श्लो. २७]

अत्र द्रुमात्स्वयं विशीर्णेन येन[२] पर्णेन वृत्तिस्तपसः परा काष्ठा हि तदपि पर्णं तयाऽपाकीर्णमिति तामपर्णां वदन्तीति पदार्थक्रमो निरस्तः ॥

यत्रात्यन्तं विभक्तीनां परस्परमसङ्गतिः ।
व्यामोहि(ह)कारिणां(णी)[३] वाक्यं **व्याकीर्णं** तन्निगद्यते ॥ ८ ॥

यथा

भूषा दिशस्तारकमद्रिभर्तु-
र्वासः शिरो[४] यस्य पदं कृशानोः ।
जघान कान्ता सरितोऽलिकं च
सुताऽऽत्मजः पातु स वोऽर्धचन्द्रः ॥ ९ ॥

अत्र यस्य भूषाऽर्धचन्द्रः, दिशो वासः, यस्याऽऽत्मजस्तारकं जघान, अद्रिभर्तुः सुता यस्य कान्ता, यस्य शिरः सरितः पदम्, यस्याऽलिकं कृशानोः पदं च स वः पातु ॥ ईदृशीं विभक्तिसङ्गतिमुत्सृज्यान्यथा गुम्फाद्व्याकीर्णत्वम् ।

अर्थस्य पौनरुक्त्येन प्रोच्यते **पुनरुक्तिमत्** ।

यथा

वारिदा वारिदा गन्धवहैर्गन्धवहैर्युताः ।
उत्कण्ठयन्ति सोत्कण्ठां युवतिं यौवनान्विताम् ॥ १० ॥

---

१ B. व. B. च.

२ B. यने.

३ Both व्यामोहि°. But in B हि is changed to ह.

४ Both सिरो. In A. सि is changed to शि by sec. m.

अत्र वारिदादिशब्दा यौगिकतया मेघादिवाचकाः पुनरुक्तिविशेषणा इति **पुनरुक्तिमद्वाक्यम्** ॥

वाक्यस्यान्तर्गतं वाक्यं सङ्गतार्थतया हि यत् ।
**वाक्यगर्भं** तदाख्यातं निन्दितं कविवर्त्मनि ॥ ११ ॥

यथा

मृगाङ्ककेतो तव यः प्रियोऽनुजः
स भीषणेन प्रविदारणे मया ।
तद(म)ग्रतो रक्ष यदस्ति शूरता
शरोत्करैर्मृत्युमुखे निधीयते ॥ १२ ॥

अत्र तमग्रतो रक्ष यदस्ति शूरतेति **वाक्येन गर्भितत्वम्** ॥

अर्थसुन्दरताहीनमपुष्टार्थं तदुच्यते ।

यथा

मातुः सुतो मनुष्योऽयं भुनक्त्यन्नं पिबत्यपः ।
मलमूत्रे विसृजति ब्रूते पश्यति गच्छति ॥ १३ ॥

अत्र स्पष्टमपुष्टार्थत्वम् ॥

अपर्याप्ततयाऽप्यर्थो यत्रैकः पर्यवस्यति ।
पदानामिह तद्वाक्यमतिरिक्तपदं स्मृतम् ॥ १४ ॥

यथा

त्वत्कृपाणेन राजेन्द्र रिपूणां स्वर्गसेविनाम् ।
योषितो मणिताटङ्कविमुक्तश्रवणा[1]ः कृताः ॥ १५ ॥

अत्र स्वर्गसेविनामित्यतिरिक्तम् ॥

यथा वा

नूनं सहृदयसमयो नागरिकाणां व्यवस्था वा ।
वैदग्ध्यख्यातिर्वा स्वयमनुरागप्रकाशनं यदिदम् ॥ १६ ॥

अत्र पदानामेकार्थपर्यवसायितयाऽतिरिक्तत्वम् । धनुर्ज्याकरकङ्कणकर्णकुण्डलादिशब्दानां महाकविप्रयोगादभ्युपगमः संनिधिप्रतिपत्तिकरो वेदितव्यः ॥

अपेक्ष्यमाणं यत्र स्याद्वाक्ये किञ्चित्पदान्तरम् ।
**तन्न्यूनं** स्याद्यथा कान्तो दुनोति हृदयं मम ॥ १७ ॥

---

१ B. ॰श्रवणाः

अत्र दुनोतीति दुःखकरणे कान्तस्य तादृगर्थद्योतकशठादिविशेषणपदमपेक्षितं, तन्न्यूनत्वान्न्यूनवाक्यम् ॥

यथा वा

अहो जलधरैरेभिरलिश्यामलकान्तिभिः ।
जातोऽस्मि दयितागाढसाध्वसालिङ्गनोत्सुकः ॥ १८ ॥

अत्र साध्वसालिङ्गनहेतुर्गर्जद्भिरिति पद(दं) **न्यूनम्** ॥

वाक्यान्तरपदैर्मिश्रं दुष्टमर्थं व्यनक्ति यत् ।
**तत्पदान्तरसङ्कीर्णं** वाक्यं वाक्यविदो विदुः ॥ १९ ॥

यथा

पातकं पोषयत्येष पुण्यमुन्मूलयत्यपि ।
दधि नन्दत्यतिघनं महिषीं साधु खादति ॥ २० ॥

अत्र पाप(पातक)मुन्मूलयति, पुण्यं पोषयति, दधि खादति, महिषीं नन्दतीति शुद्धेषु[१] वाक्येषु **पदान्तरसङ्कीर्ण**ता दुष्टमर्थं व्यनक्ति ॥

विगतो वा विरूपो वा विरुद्धगमकोऽपि वा ।
यत्र सन्धिर्भवेत्तत्तु **विसन्धीति** निगद्यते ॥ २१ ॥

तत्र **विगतसन्धि**र्यथा[२]

पाणी इमौ इमौ बाहू अहो ऊरू मनोरमौ ।

**विरूपः सन्धि**र्यथा

अवेक्ष्योत्कोस्मि नार्यङ्गश्रुर्विकुर्व्योप्सितं मम ॥ २२ ॥

**विरुद्धगमकः सन्धि**र्यथा

पूर्णकाम रणं कर्तुं मां समानयसि स्फुटम् ।
ममेह न प्रिया भूयान्नारी या भवतः प्रिया ॥ २३ ॥

अत्र पदानां सन्धिरेव **विरुद्धममङ्गलाद्यर्थं** गमयति ॥

यत्र बन्धस्य कार्कश्यं[३] तद**श्राव्य**मुदीरितम् ।

यथा

नृपः खलः कालिः कालः कृशः कोशः करोति किम् ॥ २४ ॥

---

१ Both सुद्धेषु. But in A. सु is changed to शु by Sec. m.

२ B. ०सन्धि यथा.

३ Both कार्कस्यं. But in A. स्यं changed to श्यं by Sec. m.

अत्र बन्धस्यैव **कार्कश्यम्**, न तु पदानामिति वाक्यदोषत्वम् ॥

पदानि न समर्थानि कथञ्चिदपि शंसितुम्[1] ।
अर्थं विवक्षितं यत्र **तदवाचकमु**च्यते ॥ २५ ॥

यथा

आलोकिता वलन्तीयं वल्लरी पञ्चपल्लवा ।
प्रतिपल्लवमुन्मीलदुन्निद्रकुसुमोज्ज्वला ॥ २६ ॥

अत्र भुजोऽङ्गुलयो नखानि चेति विवक्षितं वल्लर्यादीनि पदानि सर्वथा वक्तुमशक्तानी**त्यवाचकं** वाक्यम् । वाक्यस्यावाचकत्वं त्व**भिहितान्वयवादिनां मतेन** । कवयो हि लक्ष्मसिद्धौ परमतानुवादिनः ॥

यत्र वृत्तं विभग्नं स्याद्**भग्नवृत्तं** तदुच्यते ॥ २७ ॥

यथा

लतागृहे जानकी वर्तमाना
निशम्य भिक्षोर्वचनं दयार्द्रा ।
विधाय पत्रपुटके फलानि
चचाल तन्वी कतिचित्पदानि ॥ २८ ॥

अत्रो'पेन्द्रवज्रा जतजास्ततो गा'वित्युपेन्द्रवज्राख्यवृत्तलक्षणं (वृ. र. पृ. ८०) प्रथमचरणतृतीयचरणयोर्भग्नमिति **भग्नवृत्तम्** ॥

पद्येषु नियतस्थाने पदान्तविरतिर्यतिः ।
सा च्युता यत्र तद्वाक्यं **यतिच्युतक**मुच्यते ॥ २९ ॥

यथा

दयां विधेहि मयि नारायण प्रेमकिङ्करे ।
कष्टाकुलोऽपि गेहं भजे नान्यस्य कदाचन ॥ ३० ॥

अत्र सुबन्तातिङन्तयो**र्यतिभङ्गो** दर्शितः ।

यथा च

पद्मिन्या मारुतान्दोलितसरसिजयाऽनर्ति सौरभ्यलाभात् ।

अत्र 'म्रभ्नैर्याणां(नां) त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेय'मिति (वृ. र. पृ. ८९) सप्ताक्षराया **यतेर्भङ्गः** ॥

---

1 B. शशितुं, A. शंशितुं ।

तथा च

एतत्संशोभत इति मयाऽधारि कर्णे शिरीषम्[१] ।

अत्र 'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरौ(रू)चे'दिति (वृ. र. पृ. ८४) मन्द्राक्रान्तायां चतुरक्षरेषु **यतिभङ्गः** ॥

प्रकृतेरतिरिक्तस्य वर्णस्य प्रविभेदनात् ।
न जायते यतेर्भङ्गः स्वरसन्धौ सति स्फुटम् ॥ ३१ ॥

यथा

अन्तःसत्वान्यपि मुनिमनांस्य(स्या)र्तिमत्सु द्रवन्ति ।

यथा वा

स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ।
[ र. वं. स. २ श्लो. १७ (पूर्वार्धे) ]

असति स्वरसन्धौ **यतिभङ्ग** एव ॥

यथा

मल्लीदामानि तव तरुणि प्रीतये निर्मितानि ।

यथा च

अलीकसन्दर्शितबाहुमूलानि वक्रकण्ठभ्रामितेक्षणानि ।
नितम्बविन्यस्तकराणि सम्भान्ति वल्लभाविभ्रमचेष्टितानि ॥ ३२ ॥

नित्यं प्राक्पदसम्बद्धाश्चादयः प्राक्पदान्तवत् ।
परेण नित्यसम्बद्धाः प्रादयस्तु परादिवत् ॥ ३३ ॥

यथा

रम्यं सत्यं च तव वचनं कस्य न प्रीतये स्यात् ।

यथा वा

तापं मे प्रक्षिपति हृदये मानिनि त्वद्वियोगः । इत्यादि स्वयमूह्यम् ॥

प्रारब्धभङ्गीविच्छेदो यत्र तद्भग्नरीतिकम् ॥ ३४ ॥

यथा

रूपं किमप्यनुपमं मधुरं च किञ्चि-
ल्लावण्यमेतदथ काचन यौवनश्रीः ।
वेषश्च कश्चिदपि काचन भावशोभा
या मे मनस्युपदधाति मनोजपीडाम् ॥ ३५ ॥

---

१ B. सिरीषं. A. सि is changed to शि. sec. m.

अत्र चरणत्रयारब्धस्य रचनाविशेषस्य चतुर्थचरणे **रीतिभङ्गः** । तस्मात्

कोऽप्युत्सवः परमकोटिमुपैति तन्व्याः । इति पठितव्यम् ।

यथा च[1]

रजनी निर्मलचन्द्रा जीर्णसुरा यौवनं पतिः स्थविरः ।
प्रचुरयुवाऽसौ ग्रामः कुलटा मा भवतु वा म्रियताम् ॥ ३६ ॥

अत्र चतुर्थचरणे **रीतिभङ्गः** ॥

चतुरोक्तिच्युतं **ग्राम्यं** वदन्ति कवयो यथा ।

आयाह्युपविश कन्ये पश्य मदीयं मुखं पुरतः ॥
त्वां खलु कामयमानं मां त्वं वद किं न कामयसे ॥ ३७ ॥ छ ॥

इति श्रीमालकुल-श्रीमालभार.मालवमण्डलालङ्कार-**जीवनेन्द्र**नन्दन-मफरलमलिक-**श्रीपुञ्जराजविरचिते शिशुप्रबोधे काव्यालङ्कारे दोषनिरूपणं** नाम **तृतीयोऽध्यायः** ॥ छ ॥

## [ अथ चतुर्थोऽध्यायः ]

[2]रूपं वाक्यार्थदोषाणां[3] वाक्यदोषेषु लक्षितुम् ।
शक्यं तथापि तान्वच्मि बालव्युत्पत्तयेऽधुना ॥ १ ॥
रीतिभङ्गो विरोधश्च सन्दिग्धत्वम[4]पक्रमः ।
उपक्रमोपसंहारवैषम्यं दुःप्र( दुष्प्र )तीतता ॥ २ ॥
अनौचित्यमिति प्रोक्ता दोषा वाक्यार्थसंश्रयाः ।
लक्ष्मोदाहरणेष्वेषां स्फुटमाविर्भविष्यति ॥ ३ ॥

**रीतिभङ्गो** यथा

अर्धाङ्गे पार्वती मूर्ध्नि गङ्गा हालाहलं गले ।
भाले नेत्रं जटाजूटोऽधिकं चन्द्रेण शोभते[5] ॥ ४ ॥

अत्रार्धाङ्गे पार्वती, मूर्ध्नि गङ्गा, हालाहलं गलेऽधिकं शोभत[6] इत्यादिवाक्यैर्विवक्षिताया आधारजनिताधेयशोभातिशयरूपाया **अर्थरीतिभङ्गो** जटाजूटश्चन्द्रेण शोभत[7] इत्यनेन विहितः ।

---

१ B. वा.

२ A. Before this ॥ श्रीः ॥.

३ A॰नां corr. Sec. m. B॰नां.

४ A॰मुप-changad to ॰मप-sec. m.

५ B. शोभितः । A. inserts इति after शोभते.

६-७ B. शोभित.

तस्माज् ' जटाजूटेऽधिकं चन्द्रो विशोभत ' इति युक्तः [1]पाठः ।

**विरोधो** यथा

पतिं विनाप्यसौ नारी वन्ध्या पुत्रमजीजनत् ।

**सन्दिग्धत्वं** यथा

प्रियकौतुकावलोकनरसलोलविलोचने बाले ॥
न खलु क्षमावलोकितुमीदशमाराद्गता[2] माता ॥ ५ ॥

अत्राराद्गता समीपगता मातेर्ष्यये[3]दृशं कर्मावलोकितुं[4] न क्षमेति निवर्तनं वाऽराद्गता दूरगतेत्यवलोकितुं न क्षमेति प्रवर्तनं वेति **सन्दिग्धत्वं** वाक्यार्थस्य । प्रियाणां कौतुकानामवलोकनं प्रियकौतुकावलोकनं, प्रियस्य कौतुकेनावलोकनमि( नं वे )ति **सन्दिग्धम्** ।

**अपक्रमो यथा**

एते जगत्र( त्त्र )योत्पत्तिस्थितिसंहारकारिणः ।
पान्तु वः प्रमथा[5]धीशवैकुण्ठचतुराननाः ॥ ६ ॥

अत्र रुद्रादीनामुत्पत्त्यादिकारित्व**मपक्रमः** ॥

**उपक्रमोपसंहारविरुद्धं** यथा

विदुषां शास्त्रचर्चासु मा भूर्भू[6]प पराङ्मुखः ।
यशो रामस्य वाल्मीकिरनयच्छो( च्छ्रो )त्रपेयताम् ॥ ७ ॥

अत्र विरुद्धशास्त्रचर्चोपक्रमस्य कविप्रशं[7]सारूप उपसंहारो विषमः ॥

**दुःप्र( दुष्प्र )तीतत्वं** यथा

हन्तुं परं प्रवृत्तश्छिद्रैषी स्तब्धरूपतां यातः ।
पतनं व्रजत्यवश्यं कृच्छ्रात्पुनरुन्नतिस्तस्य ॥ ८ ॥

अत्र मेहनलक्षणोल्लेषा( खा )द**सभ्यप्रतीतिः** ॥

---

१ Both इत्युक्तः A. corrected as इति युक्तः by sec. m.
२ B.० मीदृगमारा०
३ A. माता इर्ष्यया इदृशं B. माता ईर्ष्यया इदृशं.
४ B. कर्माविलो०
५ A. प्रथमा changed to प्रमथा. sec. m.
६ A. भूद्भूप. B. भूर्द्भूप.
७ A. प्रसंसा corrected sec. m. B. प्रसंसा.

यथा वा

नृपते वृथैव सम्प्रति लोकेसौभाग्य[1]गर्वस्ते ।
आलिङ्गिता द्विषन्तस्तवाग्रतो यत्सुरस्त्रीभिः ॥ ९ ॥

अत्रार्थस्या**मङ्गलप्रतीतिः** ॥

**अनौचित्यं** यथा

तीरे निर्ज(र्झ)रतया वनतरुफलमूलकल्पिताहारः ।
जुह्वन्हविः कृशानौ कदाऽवलोके लता**लास्यम्** ॥ १० ॥

अत्रेदृग्लक्षणस्य सतो मुनेर्लतालास्यावलोकनरागित्व**मनौचिती**[2] ॥

दुष्टालङ्कारतादोषोऽप्यस्ति वाक्यार्थसंश्रयः ।
सोऽलङ्कारस्थले वाच्यस्तथाप्यत्रैव कथ्यते ॥ ११ ॥

दुष्टोपमा भिन्नलिङ्गा विभिन्नवचना तथा[3] ।
न्यूनाधिकाप्यप्रतीताऽपेक्ष(क्षि)णी खण्डितापि च ॥ १२ ॥

असम्भाव्यार्थका भग्नसंवृत्तिश्चाथ रूपकम् ।
निन्दितं स्यात्खण्डिताख्यमप्रतीतगुणं तथा[4] ॥
इतिहासविरुद्धं चाप्यधिकं न्यूनमित्यपि ॥ १३ ॥

तत्रोपमादोषेषु **भिन्नलिङ्गोपमा** यथा

शशी हंसीव धवलः[5]

**[वि]भिन्नवचना** यथा

सरांसीवाच्छमम्बरम् ।

**हीनोपमा** यथा

स्वामिभक्तो भटः श्वेव

**अपोक्षिण्युपमा**[6] यथा

कलङ्कः पूर्णेन्दौ भ्रमर इव सम्भाति नितराम् ।

---

१ ऽसौभाग्य० or सौभाग्य० or असौभाग्य० may be a confusion.

२ A. ॰मानौचिती.

३ A. After this three lines from न्यूनाधि० with reading यथा for तथा are crossed within brackets being wrongly repeated.

४ A. यथा corr. sec. m.

५ B. धलः.

६ B० पेक्षण्युपमा.

अत्र पुण्डरीकपदस्यापेक्षा ॥

**खण्डितोपमा** यथा

उद्भिन्नाङ्को रजनिदयितः कैरवाकारधारी ।

अत्रोपमानोपमेययोर्निर्विशेषणसविशेषणतया **खण्डितत्वम्** ॥

**असम्भाव्योपमा** यथा

तवाननान्तः स्फुरति स्मितश्रीर्ज्योत्स्नेव संफुल्लसरोजगर्भे[1] ।

अत्र संफुल्लसरोजगर्भे ज्योत्स्नाया असम्भावितत्वा**दसम्भाव्योपमा** ॥

**भग्नसंवृत्तिरुपमा** यथा

अन्यैव कापि कामिनि भाति गतिस्ते गजस्येव ।

अत्रान्यैव कापीत्यनेनानिर्वचनीयरूपा **संवृत्ति**[2]र्गजस्येवेत्युपमया **भग्ना** ॥[3]

अथ रूपकदोषेषु **खण्डितरूपकं** यथा

दृशोर्वितनुते मुदं गगनपुण्डरीकं शशी ।

अत्र गगनस्य खण्डितरूपकतया **खण्डित**[4]**त्वम्** ॥

**अप्रतीतगुणं** यथा

भाति काव्यसुधाकरः ।

अत्र काव्यस्य सुधाकरत्वारो[5]पगुणाप्रतीते**रप्रतीतगुणत्वम्** ॥

**इतिहासविरुद्धं** यथा

विद्वेषिवलवाराशिशोषणो[6]ऽत्रिः स भूपतिः ॥ १४ ॥

अत्रात्रेर्वारिधिशोषण**मितिहासविरुद्धम्** ।

---

१ B. सराज०

२ B. संवृति०

३ As seven examples are found here, the author seems to have failed to give examples of अधिकोपमा and अप्रतीतो पमा.

४ षंडित० in both. A. corr. sec. m.

५ A. रोप्य०

६ B. °च्योषणो

[1]**अधिकरूपकं** यथा

ष( ख )द्योतभानुस्तिमिरं भिनत्ति ।

ष( ख )द्योते सूर्यत्वारोपोऽधिकरूपकत्वम् ॥

**हीनरूपकं** यथा

पृथ्वीं विदारयामास स हिरण्याख्यमूषकः ।

इदमिष्टं पयोराशिर्गोष्पदं व्यवसायिनाम् ॥

अरूपादिषु रूपादेरारोपोऽतिप्रशस्यते ॥ १५ ॥

यथा

सुभगत्वगर्वपर्वतविकारकणिका भवद्भ्रुवो रेषा( खा ) ।

मज्जयति रागसागरमध्ये चेतो निरालम्बम् ॥ १६ ॥

लिङ्गादिव्यत्ययोऽप्यत्र रूपके शस्यते बुधैः ।

यथा

दृशौ पद्मवनं तस्याः करौ तु[2] कुमुदाकरः ॥ १७ ॥

इति श्रीमालकुल-श्रीमालभारमालवमण्डलालङ्कारजीवनेन्द्रनन्दन-मफरलमलिक-**श्री-पुञ्जराज**विरचिते **शिशुप्रबोधे[3] काव्यालङ्कारे वाक्यार्थदोषनिरूपणं** नामाध्यायश्चतुर्थः ॥ ४ ॥ ॥ छ ॥[4]

## [ अथ पञ्चमोऽध्यायः ]

काव्यशोभाकृतो धर्मा अन्तरङ्गतया स्थिताः ।

यैर्विना काव्यताहानिस्ते **गुणाः**[5] परिकीर्तिताः ॥ १ ॥

**ओजः प्रसादः समता श्लेषौदार्यसमाधयः ।**

**माधुर्य( र्य )सौकुमार्यार्थव्यक्तयः कान्तिरित्यमी** ॥ २ ॥

---

१ B. Before this यथा ॥ विद्वेषिबलव stands uncrossed.

२ A. करो ( रौ changed to रो sec. m ) तु.

३ A. ०बोध–

४ B. Adds श्रीरस्तु ॥

५ A. स्तेगुणा repeated, 1st crossed. B. स्तेगु stands uncrossed before स्तेगुणाः

क्रमेण लक्षयिष्यन्ते शब्देऽर्थे च व्यवस्थिताः ।
बन्धस्य यत्तु गाढत्वं तदोजः परिकीर्तितम् ॥
शिथिलत्वं प्रसादः स्यात्स ओजःसम्मतो[१] गुणः ॥ ३ ॥

**तत्रौजो** यथा

पुरःस्तबकितस्मितप्रचुरकान्तिदन्तच्छदः ।

**प्रसादो** यथा

गले गरलकालिमाऽलिकतलेऽनिलोऽलङ्कृतिः ।

अं( ओ )जसाऽसम्पृक्तः प्रसादः **पाश्चाल्यां** गुणः ॥

अं( ओ )जसा मिलितः प्रसादो यथा महाकवेः

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये[२]
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥ ४ ॥

[ र. वं. स. ३. श्लो. ७० ]

यथा वा

मुधा मा गाः क्रोधं प्रथममपराधं कथय मे
न सम्य[३]ग्ज्ञानं चेत्पिशुनवचसा सीदसि कथम् ।
इति स्वैरं पत्यौ वदति सुदती संशयपरा[४]
मनाङ्मुक्तामर्षा रमणमुखशोभां व्यवृणुत ॥ ५ ॥

बन्धस्याविषमत्वं यत्**समता** सा मता सताम् ॥ ६ ॥

यथा **महाकवेः**

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥ ७ ॥

[ कु. सं. स. १. श्लो. १ ]

यथा वा

असावतिप्रसन्नोऽपि नूनं चन्द्रस्तवाननम् ।
समानतां सरोजस्य नेतुं तन्वि समीहते ॥ ८ ॥

---

१ A. ०संस्कृतो corrected Sec. m. B. ०सकृतो.

२ A. सिश्रिये corr. sec. m. B. सिश्रिये.

३ A. क् ज्ञानं to मना ( in last line of the verse ) Sec. m. marg.

४ B. ०मना.

**विपर्ययस्तु**

मुञ्च मानमनुमानकल्पितादागसो मनसि सम्भृतं त्वया[१] ।
किं मनाग्वलितलोचनाञ्चलप्रोन्मिलज्जललवं विलोक्यते ॥ ९ ॥

अत्र पूर्वाऽपरार्धयोर्भिन्नरूपत्वात्**समताभङ्गः** ॥

बन्धस्य मसृणत्वं यत्स **श्लेषो** येन दृश्यते ।
नूनं पदेषु सम्पृक्तिर्भिन्नेष्वप्येकवृत्तिवत् ॥ १० ॥

यथा **महाकवेः**

मनीषिताः सन्ति गृहेऽपि देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेशलं शिरीषपुष्पं न पुनः पतत्रिणः ॥ ११ ॥
[कु. सं. स. ५ श्लो. ४]

यथा वा

पितुस्तव द्वारि नदन्ति दन्ति[२]नस्त्वदन्तिके तन्वि पदं दधाति कः ।
कियत्परामृश्य चिरं विभावये नयेन लभ्यो न हि ते मनोरथः ॥ १२ ॥

**विपर्ययस्तु**

गता त्वहं साऽब्जविलोचनाऽश्रुतिं श्रुता जनैः शोभिगुणोत्करा मम ।

बन्धस्य विकटत्वं यत्तदौदार्यं प्रचक्ष्यते ।
सति यस्मिन्विभाव्येत नृत्यन्तीव पदावली ॥ १३ ॥

यथा

स्फुरन्मुखर[३]मेखलं परिचलन्नितम्बस्थलं
पयोधरभरानमत्त्रिवलिसम्मिलद्विभ्रमम् ।
लुलच्छिथिलकुन्तलं वलितचारुनेत्रान्तरं
दरस्तबकितस्मितं किमपि रूपमुज्जृम्भते ॥ १४ ॥

बन्धे सम्यक्क्रमः कश्चिच्च आरोहावरोहयोः ।
स **समाधिः** स्मृतस्तेन वैचित्र्यं[४] याति भारती ॥ १५ ॥

यथा

---

१ B. तया.

२ B. omits दन्ति.

३ A. र above the line. sec. m.

४ A. वेचित्र्यं.

कुतश्चित्साकूतं क्वचन सरलं[1] क्वापि कुटिलं
क्वचित्प्रेमाविष्टं क्वचन गुणबन्धैकनिपुणम् ।
क्वचिन्मुग्धं चेतस्तव[2] चतुर तथ्यं वद पुनः
कया वृत्त्याऽस्माभिर्नियतमनुसन्धेयमधुना ॥ १६ ॥

पूर्वाऽपरपदान्त्याद्यवर्णयोर्यत्र मित्रता ।
**तन्माधुर्यं** मृदुव्यक्तविभिन्नपदताऽथवा ॥ १७ ॥

**अत्राद्यं** यथा

अयं शशी जनानन्दं दधाति न मम प्रियम् ।
तनोति दूति सन्तापमलसं ते विचेष्टितम् ॥ १८ ॥

'अयं शशी 'त्यत्र यकारशकारयो' रिचु[3]यशानां तालव्य'त्येकस्थानमैत्री । तथा 'शशी जनानन्दं [ न्द 'मित्यत्र ] ज( श )कारश( ज )कारयोः । 'जनानन्दं दधाती'ति दकारयोः[4] । एवं **प्रतिपदमक्षरमैत्री माधुर्यम्** ॥

**द्वितीयं** यथा

सुधां निषिञ्चन्निव लोचनेषु स्वभावशोभामधिकां[5] दधानः ।
स राजरत्नं नरदेवचन्द्रो[6] राजश्रिया सातिशयं विरेजे ॥ १९ ॥

बन्धस्याजर( र्जव )त्वं [7]**तत्सौकुमार्यम्**उदाहृतम् ॥ २० ॥

यथा

कम्पाकुलं पुलकिता नवकन्दलीभि-
रालिङ्गिता नवलता मलयानिलेन ।
लीलायितं किमपि लोचनलोभनीय-
मालम्बते किशलयाङ्गुलिचालनाभिः ॥ २१ ॥

पदेषूच्चार्यमाणेषु श्रोतुर्धावति मानसम् ।
पुरोवर्तिनि[8] यत्रार्थे **साऽर्थव्यक्ति**रिति स्मृता ॥ २२ ॥

---

१ B. शरलं,

२ B. चेतः स्तव–

३ A. युंचु– corr. sce. m. marg. B. युंचु–

४ A. तनोतीति दकारतयोः corr. sec. marg as above. B. तनोतीति दकारतकारयो :

५ B. ०शोमधिकां ( sic ).

६ A. सरवचन्द्रो. corr. Sce. m. B. सरदेव–

७ B. omits त.

८ B. वत्तिनि.

यथा **महाकवे**'रस्त्युत्तरस्यामि'त्यादि ॥

यथा वा

एष कंसो यदा राज्यं प्राप्तवान्पापतत्परः ।
तदाप्रभृति लोकानां सुखमत्यन्तदुर्लभम् ॥ २३ ॥

बन्धे देदीप्यमानत्वं **कान्ति**रित्यभिधीयते ।
पुराणचित्रशं( सं )काशा काव्यच्छाया यया विना ॥ २४ ॥

यथा

उदञ्चत्प्रेमश्रीः सरसतनुलावण्यलहरी-
समुद्भिन्नस्वच्छाम्बरविवृतगौरद्युतिभरा ।
मुहुः प्रत्यङ्गेषु भ्रमितमिव चक्षुर्विदधती
नताङ्गी मुग्धेयं झटिति मम चेतः प्रविशति ॥ २५ ॥

यथा वा'ऽस्त्युत्तरस्यामि'त्यादि ॥ छ ॥

इति श्रीमालकुल-श्रीमालभार-मालवमण्डुलालङ्कार-जीवनेन्द्र-नन्दन-मफरलमलिक-**श्रीपुञ्जराज**विरचिते **शिशुप्रबोधे काव्यालङ्कारे शब्दगुणाऽध्यायः पञ्चमः** ॥ ५ ॥ ॥ छ ॥

## [ अथ षष्ठोऽध्यायः ]

एत[1] एव गुणाः प्रोक्ता काव्यज्ञैरर्थवृत्तयः ।
तदुदाहरणव्यक्तिं करिष्येऽथ सलक्षणाम् ॥ १ ॥

साभिप्रायतया व्याससमासाभ्यां च दृश्यते ।
यत्रार्थस्य भृशं प्रौढिस्तद**ोजः** परिकीर्तितम् ॥ २ ॥

तत्र **साभिप्रायतयार्थप्रौढि**र्यथा **महाकवेः** ।

गुर्वर्थमर्थी श्रुत[2]पारदृश्वा रघोः सकासा( शा )दनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ॥ ३ ॥

( र. वं. स. ५ श्लो. २४ )

---

१ B. एव.

२ A. श्रु corr. sec. m. B. श्रुत-

अथवा

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्षी( क्ष्यी )चकार ।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः ॥ ४ ॥
( र. वं. स. ९ श्लो. ६७ )

यथा वा

मनोऽभिरामेण कलाविवेकिना
रतिप्रगल्भेन सुखाभिलाखि( षि )णा ।
वरेण यूना गुणपक्षपातिना
पतिंवरे संसृज सम्भृतश्रिया ॥ ५ ॥

अत्र पतिंवराभिलाषपोषकार्थतया विशेषणानां **साभिप्रायता** ॥

अभिहितप्रातिकूल्यद्योतनद्वारेण **साभिप्रायत्वमर्थस्य प्रौढिरेव** ।

यथा **महाकवेः**

अस्याङ्कलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितम्बकाञ्चीम् ।
प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ॥ ६ ॥
[ र. वं. स. ६ श्लो. ४३ ]

अत्र नवपरिणीताया रेवावलोकनेन सम[1]यपरिकलनमनङ्गक्रीडाशून्यताया हेतुरतोऽ-'स्याङ्कलक्ष्मीर्भवे'त्यभिहितस्य प्रातिकूल्यद्वारेण **साभिप्रायता** ॥

अर्थस्य **व्यासो** यथा

कुठारहतिभिः पुरा क्षितितले समुल्लुण्ठित-
स्ततश्च करपत्रके( कैः ) शकलतां मुहुः प्रापितः ।
शिलासु परिघर्षणैस्तदनु सान्द्रपङ्कीकृत-
स्ततोऽनिलविशोषितो व्रजति चूर्णतां चन्दनः ॥ ७ ॥

अर्थस्य **समासो** यथा **महाकवेः**

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥ ८ ॥
[ कु. सं. स. ६ श्लो. ९४ ]

पदार्थे वाक्यरचनं वाक्यार्थे च पदरचनं **व्याससमासयोरेव भेदौ** ॥

---

१ A. म. supra. lin. sec.

यथा **महाकवेः**

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः

[र. वं. स. २ श्लो. ७५ प्रथमपाद]

अत्रेर्नयनसमुत्थं ज्योतिरिति पदसन्दर्भरूपं वाक्यं प्रयुक्तम् ॥

यथा 'विनापराधं विदधाति कोपमि'ति वाक्ये प्रयोक्तव्येऽनिमित्तकोपेति प्रयुक्तम् ॥

यथा च 'इयं[1] देवी न भवति, किन्तु मानुषी' एतावति वाक्ये प्रयोक्तव्ये निमिषतीति पदम् ॥

**एवमन्यदूह्यम्** ॥

यत्प्रयोजनमात्रैकपरिग्रहवशाद्भवेत् ।
अर्थे किमपि नैर्मल्यं स **प्रसाद** इतीरितः ॥ ९ ॥

यथा **महाकवेः**

आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतस्वैरगतैश्च तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥ १० ॥

[र. वं. स. २ श्लो. ५.]

यथा वा

सम्पदि विपदि च तुल्यं कुलीनमनुकूलमौचितीचतुरम् ।
रतिसुन्दरं पवित्रं यस्य कलत्रं स एव गृही ॥ ११ ॥

अत्र प्रयोजनमात्रपरिगृहीतपदतयाऽर्थस्य नैर्मल्यम् ॥

**विपर्यय**स्तु

सेवतां मम करो मणिस्फुरन्मेखलागुणपदं निरन्तरम् ।

अत्र मेखला[3]गुणपदं नितम्बः । तत्र मणिस्फुरत्पदयोर्दण्डापूपन्यायपरिग्रहादर्थस्य नैर्मल्याऽभावः ॥

अवैषम्यं यदर्थस्य सा मता **समता**[4] सताम् ।

यथा **महाकवेः**

प्रियाऽनुरागस्य मनःसमुन्नतेर्भुजार्जि[5]तानां च दिगन्तसम्पदाम् ।
यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥ १२ ॥

[र. वं. स. ३ श्लो. १०]

१ B. अयं
२ B. विशा–
३ B. मेषला–
४ A. समता. marg sec. m.
५ A. –तेर्भुजार्जि– marg sec. m.

**विपर्ययस्तु**

उदेति दृशि वक्रता वलति सम्प्रति भ्रूलता
लसत्यलसता गतौ सरलतां [1]वचो मुञ्चति ।
अलङ्कृतिषु कौतुकं भजति बालिकाया मनः
कृशीभवति मध्यमं जघनमुन्नतिं विन्दति ॥ १३ ॥

अत्र यौवनारम्भदशा[2]प्रस्तावरूपस्यार्थस्या'लङ्कृतिषु कौतुकं मनो भजती'ति श्लोक-तृतीयचरणप्रतिपादितोऽर्थः सर्वसाधारणतया प्रस्तुतेन विशिष्टार्थे[3]न साम्याऽभावमुत्पादयति । तदर्थे 'वधूवरकथोत्सवे [4]सजति बालिकाया मनः' इति तृतीयचरणे पठितेऽर्थसमता भवति ॥

काचिदर्थस्य घटना **श्लेष** इत्यभिधीयते ॥

यथा

न हि तव वचोभित्तिं भेत्तुं क्षमं[5] कठिनामिमां
किमनुनयासि स्वैरं साधो व्रजाऽस्तु शिवं तव ।
इति निगदिते दूत्या कान्तेऽपगच्छति[6] भीतया
कलहमखिलं न्यस्यैतस्यां प्रियः परिमोदितः ॥ १४ ॥

अत्र विघटितस्यानुनयरूपस्यार्थस्य पुनर्घटनं **श्लेषः** ॥

अग्राम्यत्वं यदर्थस्य त**दौदार्य**मुदाहृतम् ॥ १५ ॥

यथा

सानन्दं शनकैः प्रविश्य निलयं संविश्य तल्पोपरि
प्रेमोत्कण्ठितमानसा सरभसं पर्यस्य दोर्वल्लरीम् ।
निद्राव्याजमुपागतं प्रियतमं ताम्बूलदानच्छला-
दुद्य[7]न्मन्मथभावभीतिवचनैरा[8]बोधयत्प्रेयसी ॥ १६ ॥

**विपर्ययस्तु दोषनिरूपणाध्याये** द्रष्टव्यः ॥

---

१ B. शरलतां.
२ B. –दृशा–
३ A. विशिष्टार्थे– marg. sec. m.
४ A. स uncrossed. भ sup. lin. sec. m.
५ A. क्षमां corr. sec. m क्षमं. B. क्षमां.
६ B. कान्तप० (sic).
७ A. द्य marg. sec. m.
८ A. –शनकै– corr. sec. m. marg. B. –वचनरा० (sic).

अन्यधर्मस्ततोऽन्यत्र सम्यगाधीयते हि यत् ।
तस्मात्**समाधि**रित्युक्तो गुणोऽर्थस्य विचक्षणैः ॥
तस्याऽनेकविधा भेदा दिङ्मात्रं तु प्रकाश्यते ॥ १७ ॥

तत्राऽचेतने सचेतनधर्मारोप**समाधि**र्यथा

चक्षुर्मदालसमुपासितवक्रभावं
भ्रूवल्लरी कलितनृत्यविलासलीला ।
उन्निद्रपद्मवदने मुदमातनोति
मन्दस्मितं च दशनद्युतिमांसलं ते ॥ १८ ॥

अरूपे रूपसमाधानात्**समाधि**र्यथा

दिगङ्गा( ङ्ग )नासु वशिता( च सितं ) यशो यैरवतंसितम् ।
तेषामपि विलासैस्ते मनो मोहे निमज्जति ॥ १९ ॥

अरसे रसारोपात्समाधिर्यथा

तन्वङ्गि कान्तयोगे[१] रुचिरिन्दोर्या तवाऽभवन्मधुरा ।
सा पुनरद्य वियोगे हन्त मुहुः क्षारतां याति ॥ २० ॥

अद्रवे[२] द्रवतारोप**समाधि**र्यथा **महाकवेः**

**व**शिष्ठ( सिष्ठ )धेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥ २१ ॥

[ र. वं. स. २ श्लो. १९. ]

**अ**घने घनत्वा[३]रोप**समाधि**र्यथा

सूचिभेद्यैस्तमोभिः ।

**अ**कर्तरि कर्तृत्वारोप**समाधि**र्यथा

इदं मम धिया कार्यं प्रागेव हि विलोकितम् ।
किन्तु मे लज्जते ष( ख )ड्गः शत्रून्निघ्नन्संवृत्ता( ता )न् ॥ २२ ॥

यत्किञ्चिदुक्तिवैचित्र्यं[४] तन्**माधुर्य**मुदाहृतम् ॥ २३ ॥

---

१ A. कांगे corr. sec. m. marg.
२ B. अत्रवे ( sic ).
३ A. अधनत्वा॰ corr. sec. m. marg.
४ A. -क्तिचित्र्यं corr. sec. m. marg.

यथा

मुधा न गदितं मदे( वेद् ) भवति तत्सुधास्वादनं
विमुक्तिरपि निश्चलोल्लसितसम्मदा[१] नान्यथा ।
वदन्तु सनकादिकाः पुनरिदं रसज्ञा हरे
यदस्ति तव सेवनोत्सवरसेन किञ्चित्समम् ॥ २४ ॥

यथा वा **महाकवेः**

न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः[२] ।
ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ॥ २५ ॥
[ र. वं. स. ३ श्लो. २०. ]

**अर्थस्या**परुषत्वं यत्**सौकुमार्य**मुदाहृतम् ॥ २६ ॥

यथा **महाकवेः**

बाष्पायमानो( णो ) बलि[३]मन्निकेतमालेष्य( ख्य ) शेषस्य[४] पुनर्विवेश ।
[ र. वं. स. १४. श्लो. १५ उत्तरार्ध. ]

अत्र स्वर्गतस्येति प्रयोक्तव्य आलेख्य[५]शेषस्येति प्रयोगादर्थस्यापरुषत्वम् ।

यथा वा

ताते यशोऽवशेषे जयशोभामाप्तवान्कुमारोऽपि ।
साधयति **वीरसेनः** संयति परमण्डलं जेतुम् ॥ २७ ॥

अत्र गच्छतीत्यर्थे साधयतीति प्रयोगः **सौकुमार्य**मुद्वहति ।

यथा वा

मदनमलिकनेत्रस्फारकीलानिपीतं
सपदि मनसिजत्वं लम्भयित्वेन्दुमौलिः ।
रतिपरिभवकोपानौचितीं( तीं ) योऽपनेतुं
वहति वपुषि नित्यं वल्लभां वः स पायात् ॥ २८ ॥

---

१ A. लसिमदा corr. sec. m. marg.
२ A. लाहर्षितः corr. sec. m. B. लाहर्षिलितिः ( sic ).
३ A. कलि० corr. sec. m.
४ A. ०लोष्या० changed to ०लेख्य० sec. m. B. ०सेसस्य.
५ A. –लोल्य० corr. sec. m.

वस्तुस्वभावस्फुट[1]ताऽर्थव्यक्तिरिति कीर्तिता ।
तां जातिं मन्वते केचिद् ब्रुवते[2] चात्र लक्षणम् ॥ २९ ॥

यस्यां यादृगवस्थायां स्याद्रूपं यस्य वस्तुनः ।
तत्तथैवार्पयत्युक्तिरग्राम्या जातिरिष्यते ॥ ३० ॥ इति ॥

यथा महाकवेः

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ३१ ॥

[ कु. सं. स. ३ श्लो. ७० ]

यथा वा

आकुञ्चच्चिबुकाऽवसक्तवसनप्रान्तेन वक्षोरुहौ
सञ्छाद्य त्वरया मुहुर्विदधती नीवीं क्वणत्कङ्कणा ।
उन्मीलत्कनकप्रकाशजघनव्यालोलदृष्टिर्वल-
च्छ्रोणीवेष्टनकम्पितोरुरबला मच्चित्तमालम्बते ॥ ३२ ॥

यथा वा

जृम्भोद्भासितविभ्रमालसदृशा साकूतनृत्यद्भ्रुवा
सोच्छ्वासत्रिकभङ्गभङ्गुरवलीविश्रं( स्रं )सिनीविश्रिया ।
धमि( म्मि )ल्लावृतिकैतवोर्ध्वभुजयोदञ्चत्कुचाभोगया
तस्थे दृष्टिपथे हरेरपरया किञ्चिद्वलत्कण्ठया ॥ ३३ ॥

यथा वा

कण्ठे गद्गदवाङ् न यच्छति गिरं व्रीडाचलल्लोचना
प्रेम्णाऽऽलोकनलोलुपा नमयति स्विद्यत्कपोलं मुखम् ।
जातालिङ्गनकौतुका करतलस्पर्शेऽपि कम्पाकुला-
न्यङ्गानि स्थगयत्युदग्रपुलकं( का )[3] नव्योपयामा वधूः ॥ ३४ ॥

उद्रिक्तभावता कान्तिरुच्यते काव्यकोविदैः ॥ ३५ ॥

यथा

---

१ A. वस्फुट॰ corr. sec. m. by adding स्तुस्वभाव

२ A. ॰द्रुवते corr. sec. m. B. ॰द्रुवते.

३ B. ॰पुलक.

पुलकिततनुयष्टिर्वेपमाना नताङ्गी
तरलितनयनश्रीर्लक्षमाणाऽपि वृन्ते ।
विरचयति वयस्याहास्यमन्तर्विमोहा-
न्निजकररुहकान्तिं चिन्वती पल्लवेषु ॥ ३६ ॥

अत्र कुसुमवाटिकायां पुष्पावचयं विचरन्त्या ( विरचयन्त्या ) **मधुञ्जमर्याश्चन्द्रकेतो**-रवलोकनेनोद्रिक्तभावता **कान्ति**रिति ॥

**रीतिः संवृति( त्ति )रौचित्य**मिति केचिद्गुणत्रयम् ।
आहुर्ये **सौकुमार्यार्थव्यक्तिकान्ति**षु निर्ममाः ॥ ३७ ॥
कोऽपि बन्धविशेषात्मा गुणो **रीति**रियं पुनः ।
**वैदर्भगौडपाञ्चाल**मार्गभेदात्त्रिधा मता ॥
समस्तगुणसंम्पन्ना **वैदर्भी**ति निगद्यते ॥ ३८ ॥

यथा **महाकवेः**

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥ ३९ ॥

[ अ. शा. अं. २. श्लो. ६ ]

यथा वा

प्रेम्णा लोलविलोचने रतिरसाचेलाञ्चलं कर्षति[1]
प्राणेशे चकितेव विभ्रमवती साचिभ्रमल्लोचना ।
व्रीडोद्वेगमवाप्य कातरतया तद्वक्षसैव स्वयं
विश्रं( स्रं )सद्वसनाञ्चलं कुचयुगं कान्ता पिधत्तेतराम् ॥ ४० ॥

**ओजःकान्ति**मती **रीतिर्गौडी**येति निगद्यते ।
सेयं माधुर्यनिर्मुक्तोल्बणाक्षरविजृम्भिता ॥ ४१ ॥

यथा

रक्षोयक्षोरगाः के भवतु रणभुवि व्यूढतत्पक्षपातः
क्षिप्रं मच्छस्त्रघातक्षपितभुजव( ब )लप्रोत्सवो वासवोऽपि ।

---

१ A. ०चेलांकर्षति corr. sec. m. marg. B. ०चेलां मुंचति.

दंष्ट्रामुत्पाट्य दर्पात्प्रलयचटुलितत्र्यम्बकक्रोधचण्ड-
स्तुण्डाद्दैवस्वस्याप्यहमिह झटिति प्रेयसीमुद्धरामि ॥ ४२ ॥

**माधुर्य**सम्प्लुतपदा पुराणच्छाययाऽन्विता ।
बन्धशैथिल्य[1]कलिता **पाञ्चाली**ति निगद्यते ॥ ४३ ॥

यथा

निजान्पतीन्किं वनिता गृहे गृहे
स्वयं समालिङ्ग्य विनोदयन्ति नो ।
विना रुषा चेतसि मे स्थिता कथं
ममेप्सितं पूरयितुं विकम्पसे ॥ ४४ ॥

**असमासा** तथा **दीर्घसमासाऽल्पसमासिका** ।
इति **रीति**त्रयस्यान्ये ब्रुवते लक्षणं क्रमात् ॥ ४५ ॥

क्रमेणोदाहरणानि

असमासा यथा ]

न हि तव वचोभित्तिं भेत्तुं क्षमं कठिनामिमां
किमनुनयसि स्वैरं साधो व्रजाऽस्तु शिवं तव ।
इति निगदिते दूत्या कान्तेऽपगच्छति भीतया
कलहमखिलं न्यस्यैतस्यां प्रियः परिमोदितः ॥ ४६ ॥

[ दीर्घसमासा यथा ]

बाहुव्यालोलनागाऽजिनपवनसमुद्भूतदिक्कुम्भिकुम्भ-
स्फूर्जत्सिन्दूरसन्ध्योदयदमरधुनीसीकरस्फारतारम् ।
नृत्यं तत्पातु शम्भोश्चरणविमृदितक्षोणिभारप्रयास-
व्यग्रव्यालेन्द्रशीर्षप्रणतभयसमुद्भ्रान्तदैतेयवर्गम् ॥ ४७ ॥

[ अल्पसमासा यथा ]

स्तनद्वयोत्पीडनपूर्वरंहसा घनानुरागोत्पुलकेन वक्षसा ।
मिलद्विनोदे कुसुमेषुसङ्गरे प्रियापरीरम्भसुखानि निर्विश ॥ ४८ ॥

**अथार्थस्य रीतिः ।**

भङ्ग्या कयाचिदर्थस्य रचना रसकौशलात् ।
कविना विहिताऽस्यास्तु निर्वाहो **रीति**रुच्यते ॥ ४९ ॥

---

1 B. –सैथिल्य–

यथा

त्रिजगति भगवत्यामेव कारुण्यलक्ष्मी-
जयति मयि च काचिच्छोचनीत्वसम्पत् ।
उभयतरतमत्वं दैन्यविच्छेदशीले
यदि नयनपथं ते यामि जाने तदानीम् ॥ ९० ॥

यथा वा **महाकवेः**

चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ ९१ ॥

[ र. वं. स. १० श्लो. २२ ]

यथा वा

दूरागत इति विद्वानिति विप्र इति प्रभो कुटुम्बीति ।
क्षीणोपाय इति त्वत्संश्रय इति तेऽनुकम्प्योऽस्मि ॥ ४८-( ९२ ) ॥

यथा वा

पूजयति देव यस्त्वां स भवति पूज्यः स्तवीति स स्तुत्यः ।
यो वन्दते स वन्द्यो ध्यायति योऽसौ मृगीदृशां ध्येयः ॥ ४९-( ९३ ) ॥

**विपर्यय**स्तु दोषनिरूपणे द्रष्टव्यः ॥

अनिर्वाच्य इवोत्कृष्टो यस्यामर्थः प्रतीयते ।
यत्तत्किमादिभिर्योत्या **संवृत्तिः**[1] सा निगद्यते ॥ ९४ ॥

यथा

ते केचन दृशि भावाः स च कश्चिद्विभ्रमो वपुषि ।
वचनेषु तेषु तन्व्याः काचन सा माधुरी जयति ॥ ९५ ॥

यथा वा

रूपं किमप्यनुपमं मधुरं च किञ्चि-
ल्लावण्यमेतदथ काचन यौवनश्रीः ।
वेषश्च कश्चिदथ काचन भावशोभा
कोऽप्युत्सवः परमकोटिमुपैति तन्व्याः ॥ ९६ ॥

## **अर्थौचित्यम्** ।

लोकप्रसिद्ध**मौचित्यं** तदवस्थादिभेदतः ।
जायते बहुधा तत्तु दिङ्मात्रेण प्रकाश्यते ॥ ९७ ॥

---

१ B. संवृतिः

**शब्दौचित्यं** यथा

नितम्बिनि विलम्बसे कथमिवोत्सवालोकने ।

यथा वा

संवृत्ते संवर्ते धरणीं धर्तुं भवाञ्शेषः ।

यथा वा

दहतु दुरितमग्निर्वा( र्वा )णजन्मा पुरारेः ।

अत्र दहत्विति पदमुचितम् ।

यथा

'तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः ।'

[ र. वं. स. १. श्लो. ४७ पूर्वार्ध. ]

अत्र प्रियदर्शन इत्युचितं पदम् ।

'व्रताय तेनानुचरेण धेनोः'

[ र. वं. स. श्लो. ४ प्रथमपाद. ]

अत्राऽनुचरेणेत्युचितम् ॥

एवमालि निगृहीतसाध्वसं शङ्करो रहसि सेव्यतामिति ।

शङ्कर इत्युचितम् । इत्यादि **स्वयमूह्यम्** ॥

**अर्थौचित्यं** यथा

स्तुवन्ति त्वां नार्यो गुणवति यथा तत्समधिको
विलासस्ते[1] किन्तु प्रतिवचनमूकत्वमगुणः ।
वदत्येवं पत्यौ[2] स्फुरदधरशोभाञ्चितमुखी
सखीं लज्जानम्रा वलितनयनाऽलोकत वधूः ॥ ५८ ॥

यथा वा

भर्तुर्भक्तिरता भवेत्यभिहितां नारीभिरालोकित-
प्रेयोमन्तुमयीं व्यथां कथयितुं[3] नैव क्षमां व्रीडया ।
बालां प्राप्तवतीं कथञ्चन रहो निःश्वस्य बाष्पं दृशो-
स्तन्वानां दयितो निधाय पदयोर्मूर्धानमानन्दयत् ॥ ५९ ॥

यथा वा **महाकवेः**

---

१ A. विलासस्त ( sic. )

२ B. *त्यौ.

३ B. कथ *तुं

पत्युः शिरश्चन्द्रकलामनेन स्पृशेत( ति ) सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ॥ ६० ॥
[ कु. सं. स. ७ श्लो. १९. ]

इत्यादि **स्वयमूह्यम्** ॥

एवं पुरातनकवीश्वरसम्मतिमूलतः ।
कृतं मयाऽपि विशदं **गुणानां** प्रविवेचनम् ॥ ६१ ॥ ॥ छ ॥

इति श्रीमालकुल-श्रीमालभार मालवमण्डलालङ्कार-**जीवनेन्द्र**सुत-मफरलमालिक-**श्रीपुञ्जराज**विरचिते **शिशुप्रबोधे काव्यालङ्कारेऽर्थगुणनिरूपणं** नाम **षष्ठो**ऽध्यायः ॥ छ ॥ छ ॥ ६ ॥

## [ अथ सप्तमोऽध्यायः ॥ ]

गुणसौभाग्यरम्यायाः कवितायाः स्त्रिया इव ।
बाह्यशोभाऽतिशयकृद्यो धर्मः कङ्कणादिवत् ॥ १ ॥

सोऽ**लङ्कारो**ऽस्य शब्दार्थवृत्त्या **भेदद्वयं** मतम् ।
तत्राऽद्यो **यमका**दि[ : ]स्याद्द्वितीय **उपमा**दिकः ॥ २ ॥

शब्दस्यालङ्कारा **यमकानुप्रासचित्राद्याः** ।
ते बहुभेदक्लिष्टा यद्यप्युद्वेगदायकास्तदपि ॥ ३ ॥

व्युत्पित्सूनामे[1]तन्मार्गस्याऽऽलोकनाय मया ।
उपदिश्यन्ते कतिचित्प्रथयन्तः शक्तिसामर्थ्यम् ॥ ४ ॥

भिन्नार्थानां पदानां यत्स्थानेषु परिवर्तनम् ।
**यमकं** नाम तत्प्रोक्तं तद्भेदाः सन्त्यनेकधा ॥ ५ ॥

परिवर्तनं नाम प्रकारान्तरेणा[2]ऽपि सारूप्यदर्शनम् ।

श्लोकश्लोकार्धचरण**यमकान्य**परे जगुः ।
तेषामुदाहृतिष्वेव लक्षणं व्यक्तिमेष्यति ॥ ६ ॥

तत्रा**दियमकं** यथा

मानसम्मानसम्पन्न( न्नं )मामकम्मामकम्पितम् ।
परितोऽपरितोषेऽपि त्रायतेऽत्रायतेर्वशम् ॥ ७ ॥

**अस्यार्थः**—अत्र परितोऽपरितोषेऽप्यकम्पितमायतेरुत्तरकालस्य वशं, मानेनाऽभिमानेन सम्पन्नं मामकं मदीयं मानसं मां त्रायते ॥

---

१ B. व्युत्पत्सूनाम् ( sic ).

२ B. प्रकारंतरेणा०

**मध्ययमकं** यथा

सुकृतसादर सादर विद्विषां शशिसमानतमाऽऽनतवर्धन ।
तव शुभावन भावनयाऽङ्गना दधति कामपि कामपिपासुताम् ॥ ८ ॥

**अस्यार्थः**—हे सुकृतसादर, विद्विषां सादं खेदं रातीति ददातीति सादर, शशिसमानतम चन्द्रेण सदृशतमाऽऽनतवर्धन, शुभावन कल्याणरक्षक तव भावनयाऽङ्गनाः कामपि कामपिपासुतां दधति ॥

**अन्त्ययमकं** यथा

समरे भृतभीमधुरं मधुरं वसुदेव सदा सदयं सदयम् ।
तव सूनुमुपैमितरामितरानपहाय कृतेशरणं शरणम् ॥ ९ ॥

**अस्यार्थः**—हे वसुदेव ! समरे भृता भीमस्य रुद्रस्य धूर्येन तं, तादृशं मधुरं मनोज्ञं, सदा सदयं दयया सहितं, सदयं सन्नयः शुभावहो विधिर्यस्य तं, तादृशं कृतेशरणमीश्वरेण सह कृतसङ्ग्रामं तव सूनुमितरानपहाय शरणमुपैमितराम्[१] ॥

**भिन्नचरणयमकं** यथा

गजराजमुखं सम्यगजरामयताप्रदम्[२] ।
भवनन्दनमानन्दभवनं चिन्तयामि तम् ॥ १० ॥

स्पष्टम् ॥

**सन्दंशयमकं** यथा

चतुरम्बुधिसीमभुजं चतुरं समुदश्चितबाहुबलं समुदम् ।
तमहं रघुनाथमनन्तमहं कलये हृदि संहृतपङ्कलये ॥ ११ ॥

**अर्थः**—समुदं मुदा सह वर्तमानम्, अनन्तमहमनन्तोत्सवम्, पङ्कस्य पापस्य लय आसङ्गः संहृतो यस्मिंस्तादृशे हृदि कलये ॥

**सम्पुटयमकं** यथा

साधनं यस्य शक्तीनां त्रितयं धरणीभुजः ।
तस्य कोशं समायाति स्वयमेव रसाधनम् ॥ १२ ॥

**शृङ्खलायमकं** यथा

उप[३]कारितया जगतीविदितो
विदि तोषधरोऽयमनूनमतिः

---

१ B. ॥ छ ॥
२ A. -प्रदां corr sec. m. B. -प्रदां
३ प repeated wrongly in both.

नमति प्रमथेशवधूमधु[ना]
मधुना सममाप्तुमुदारवचः ॥ १३ ॥

[**अर्थः**—] वेत्तीति वित्तस्मिन्नुपकारितया जगतीविदितः। तोषधरस्तोषपर्वतः सन्तोषोन्नत इत्यर्थः। तोषं धरतीति वा। अनूनमतिरयं मधुना सममुदारवचः प्राप्तुमधुना प्रमथेश[1]वधूं भवानीं नमति।

चतुश्चरणेष्**वादियमकं** यथा

नवनीतभुगाविरस्तु चित्ते नवनीयो यमिनां स नन्दबालः।
नवनीरदकान्तिरुद्यतोऽरीनवनीतल्पशयान्विधातुमाजौ ॥ १४ ॥

आजौ सङ्ग्रामेऽरीनवनीतल्पशयान्विधातुमुद्यतो नवनीरदकान्तिर्यमिनां नवनीयो नवनीतभुक् स नन्दबालश्चित्त आविरस्त्वित्यन्वयः॥

चतुश्चरणेष्**वन्त्ययमकं** यथा

अन्तादनुतनयानां मुदिता[2] देव मदेन वीतनयानाम्।
माहिषवेतनयानां व्यनुवन् देवीं करीन्द्रशातनयानाम्॥ १५ ॥

[**अर्थः**—] मदेन वीतनयानां माहिषवेतनयानां माहिषसम्बन्धि वेतनं यान्ति प्राप्नुवन्तीति तादृशानां दनुतनयानामन्तान्मुदिता देवाः करीन्द्रशातनं[3] [यानं] वाहनं सिंहवाहनां देवीं व्यनुवन्नस्तुवन्॥

**महायमकं** यथा

[4]सहसा सहसा सरसा सरसा यमिनं यमिनं परमाप रमा।
दरतोदरतोऽसमया स मयाऽधिगतो धिगतोऽपि हि तं पिहितम्॥ १६ ॥

[**अर्थः**—] सहसाऽकस्मात्सहसा सस्मिता, सरसा सप्रीतिः सरसा धरण्या सह वर्तमाना, परं यमिनं यमिनं स्वामिनं रमाऽऽप; स दरतोदरतो भयोच्छेदनतत्परोऽसमयाऽतुल्ययांमयाऽधिगतोऽतोऽपि पिहितं हि तं धिक्॥

**चतुर्भद्रयमकं** यथा

---

१ प्रथमेश० corr. sec. m.

२ B. –तनयानामुदिता.

३ A. –सातनं corr. sec. **m**, B. सातनं.

४ A. In this verse repetitions of all groups of three letters are mentioned by No. 2 except 'यमिनं' which is wrongly written three times. B. 'यमिनं' three times.

अभिमानवतेऽनवते नवते न वते[1]न मनः खलु कुप्यति मे ।
मधुवासमये समये समये सम येन[2] सुखं तमुपैहि गुणम् ॥ १७ ॥

हे नव तरुण । इन स्वामिन् । बत खेदे । अभिमानवते, नाऽवतीत्यनवंस्तस्मा अनवते । त[3] इति तुभ्यं मनो न खलु कुप्यति । मधुवासमये[4] वसन्तवासप्रचुरे[5] समये येन गुणेन सुखं समये सम्यक् प्रोप्नोमि । हे सम सलक्ष्मीक तं[6] गुणमुपैहि ॥

**श्लोकयमकं** यथा

घनसारभासमानं कपालिनं सर्वदातारम् ।
अरिदरकरमगतनयाकान्तं विद्धि व्रजश्रीपम् ॥ १७ ॥[7]

घनस्य मेघस्य सारो गर्भस्तस्य भा कान्तिस्तया समानं सदृशम् । कं सुखं पालयतीति कपालिनम् । सर्वदातारम् सर्वस्य दातारम् । अरिदरौ चक्रशङ्खौ करयोर्यस्य तम् । न गतो नयो येभ्यस्तेषामकस्यान्तं नाशकम् । व्रजश्रीपालकं विद्धि जानीहि । इति कृष्णस्य पक्षे व्याख्या ।

घनसारः कर्पूर इव भासमानम् । कपालमस्यास्तीति तम् । सर्वदाऽनवरतं तारमुज्ज्वलम् । अरिदरकरं शत्रुभयङ्करम् । अगतनयाकान्तं पार्वतीकान्तम् । श्रीपं श्रीविषम् । [तत्] पिबतीति तं [हि] हे वित् बुद्धे । व्रज याहि । अथवा जानीहि । य एव गत्यर्थास्त एव ज्ञानार्थाः । इतीश्वरपक्षे व्याख्या ॥

**अर्धश्लोकयमकं** यथा

राजा कुवलयामोदश्रीस्पर्शनवशोऽभितः ।
राजा कुवलयामोदश्रीस्पर्शनवशोभितः ॥ २० ॥

राजा नृपः कुवलये पृथ्वीवलय ओमादेनाऽऽनन्देन यच्छ्रियो लक्ष्म्याः स्पर्शनं प्रतिपादनं तद्वशः । अभितः सर्वतः ।

---

१ Here बत is to be considered as वत, according to a maxim ' वबयोरऽभेदः '.

२ B. after this समये is wrongly inserted.

३ A. omits ते.

४ B. °वासममये.

५ B. —वासप्रचुरे changed to वासरे.

६ A. —कांत corrected as –क तं B. —कांत.

७ This verse is repeated in both as it is shown above But in A the first one is crossed.

राजा चन्द्रः कुवलयानामामोदस्पर्शेन परिमलस्पर्शेन नवशोभितः[१] अस्तीति शेषः ॥

**चरणयमकं** यथा

मतानवद्यत्वमनन्तरायं मतानव द्य त्वमनन्तरायम् ।
प्रभावतो मानवदानवन्तं[२] प्रभावतो मानवदानवं तम् ॥ २१ ॥

मतमनवद्यत्वं निर्दोषत्वं यस्य तम् । अनन्तो राधनं यस्य तम् । न विद्यतेऽन्तरायो विघ्नो यस्य तम् । प्रभावतः प्रभाऽस्ति येषां तान् । मानं बदन्तीति मानवदास्तानवन्तं रक्षन्तं तम् । मानवदानवं नरं दैत्यमिव विद्यमानं तं प्रभावतो द्य खण्डस्य ॥

**चरणान्तयमकं** यथा

तमालपत्राऽसितया तु धानं सुखस्य कान्त्या युतमादिदेवम् ।
तमालप त्रासितयातुधानं निरन्तरं भारति रामचन्द्रम् ॥ २२ ॥

तमालपत्राऽसितया कान्त्या [तु] युतम् । सुखस्य धानम्[३] । [तमादिदेवं] त्रासितयातुधानं रामचन्द्रं भारति निरन्तरमालप ॥

वर्णावृत्तिरनुप्रासश्चरणेषु पदेषु च ।
तेषामुदाहृतिष्वेव रूपमाविर्भविष्यति ॥ २३ ॥

**चरणेष्वाद्यानुप्रासो** यथा

**जा**नकी(कीं) विरहय्यान्यां[४] **जा**यां स्वप्नेऽपि नेच्छति ।
**जा**नेऽहमिति रामस्य **जा**ग्रद्रागामवस्थितिम् ॥ २४ ॥

**चरणे मध्याऽनुप्रासो** यथा

सदा न**मो**ऽस्तु रामाय विश्वव्या**मो**हहारिणे ।
रक्षस्त**मो**दिनेशाय गुणग्रा**मो**न्नताय ते ॥ २५ ॥

**चरणान्त्यानुप्रासो** यथा

रामं जगत्त्रयीबन्धुं जानकीरजनीविधुम् ।
नमामि करुणासिन्धुं तत्त्वसंविद्वनीमधुम् ॥ २६ ॥

**आद्यन्तचरणानुप्रासो** यथा

**का**तरेक्षणमवेक्ष्य गोपि**का का**ऽपि कृष्णमतिमात्रमुत्सु**का** ।
**का**ममोहमथितश्लथांशु**का का**नने कलितकेलिकौतु**का** ॥ २७ ॥

---

१ A. After -शोभितः, सर्वतः is wrongly inserted.
२ A. This पाद Sec. m. marg.
३ Both read सुखस्य धानं after रामचन्द्रम्.
४ A. ०य्यानां

**यत्यन्त्याऽनुप्रासो** यथा

जयति सुरसमूहत्राणसंलब्धदेहः
परमतनुरनीहः सज्जनस्वान्तगेहः
अविदितपरिणाहः प्रौढतेजःप्ररोहः
क्षपितभुवनमोहः श्रीविहारो नृसिंहः[1] ॥ २८ ॥

## ॥ अथ पदानुप्रासाः ॥

तत्र **पदाऽऽद्यनुप्रासो** यथा

काऽपि कान्तकृतकैतवाऽकुला कोपना कलितकामकर्मणा ।
कोकिलाकुलकलेऽपि कामिनी कम्पते कुसुमकेलिकातरा ॥ २९ ॥

**पदमध्याऽनुप्रासो** यथा

विन्दते मदनवेदनामियं चन्दनार्द्रसदनानि निन्दति ।
ऐन्दवादुदयतोऽवसादतः स्वेदनेन[2] सुदती न नन्दति ॥ ३० ॥

**अन्ताऽनुप्रासो** यथा

अवता भयताऽपहृता भवता जनता सततायवता मुदिता ।
अहिता विहितात्महिता विहिता [3]वनिता जनितार्तरुताकुलिता
(ताः) ॥ ३० ॥

[4]**सङ्कीर्णाऽनुप्रासो** यथा

विलोलपल्लवालीनमलयाऽनिललालिता[5] ।
विलासिनीव ललिता वलते लवलीलता ॥ ३१ ॥

अनिलेन विलुलितानां नलिनिनिलीनालिनामलीकेन ।
तव लुलिताऽलकललितो नलिने नवनीलिमोल्लसति ॥ ३२ ॥

अरविन्दसुन्दरोदरमकरन्दास्वा[6]दमेदुरामोदम् ।
नदविन्दिन्दिर[7]वृन्दं नन्दति शरदिन्दिरानन्दम् ॥ ३३ ॥

---

१ B. नृसींहः.
२ B. °सादनस्वेदनेन. (sic)
३ B. om. hapl. विहिता.
A. ४ to ५ Portion sec. m. marg.
६ A. –स्वादु– corr. sec. m. B. –खादु–.
७ B. ०दिंदिंदर०

कल्याण[१]दायिनि गुरौ कुलकण्टकत्वा-
त्कौलीनवान्कलयति प्रतिकूलतां यः ।
तस्मिन्द्विषत्प्रलयकालकरालमूर्ते
द्राक्कालि कोलमुखि कालय कालदण्डम् ॥ ३४ ॥

**अभिन्नार्थतया** यत्तु पदानां परिवर्तनम् ।
तन्महाकविभिर्नूनमनुप्रासेषु गण्यते ॥ ३५ ॥

यथा **महाकवेः**:

**दश**रश्मिशतोपमद्युतिं यशसा दिक्षु **दश**स्वपि श्रुतम् ।
**दश**पूर्वरथं यमाख्यया **दश**कण्ठारिगुरुं विदुर्बुधाः ॥ ३६ ॥
[र. वं. स. ८. श्लो. २९]

यथा वा

**पद्म**नाभोऽब्धिमथने **पद्म**जन्मादिभिः स्तुतः ।
**पद्मा**ननां श्रियं देवीं **पद्म**पाणिमविन्दत ॥ ३७ ॥

अस्थाननियमं यच्च दूरव्यवहितं पदम् ।
**भिना(न्ना)र्थं** परिवर्तेत ज्ञेयोऽनुप्रास एव सः ॥ ३८ ॥

यथा

**कन्दर्प** सर्वङ्कष दुर्विनीत त्वं सायकैर्मामसि किं जिघांसुः ।
दैवेऽनुकूले[२] विरहाऽवसाने **कं दर्प**मानेष्यसि हन्त भूयः ॥ ३९ ॥ छ ॥

अथ **चित्रकवित्वं** तु दिङ्मात्रेण प्रकाश्यते ।
रसिकोद्वेगदायित्वात्तद्भेदा नैव दर्शिताः ॥ ४० ॥

ग्रन्थगौरवभीतेन पृथगुद्देशलक्षणे ।
न मयाऽभिहिते तस्य रूपमेव प्रकाशितम् ॥ ४१ ॥

**पद्मबन्धो** यथा

यादसा धृतनागे या यागेनाऽसुरजे तु या ।
यातुजे भीत्यमत्रेऽयायात्र मय्यस्तु सा दया ॥ ४२ ॥

**अस्यार्थः**—हे यागेन यज्ञेश सा दया । अयायाऽऽयात्रोऽयायात्रस्तस्मिंश्छुभाव-हविध्युन्मुखे मयि सा दयाऽस्तु । सा का । या दया[३] यादसा ग्राहेण धृतनागे धृतकुञ्जरे ।

---

१ B. कल्याणि.

२ B. दैवेनकूले.

३ B. omits दया.

त्विति पुनः । या दयाऽसुरजे प्रह्लादे । या दया भीत्यमत्रे यातुजे भयपात्रे विभीषणे । आसीदिति शेषः ॥

**चक्रबन्धो** यथा

कामनानामका देवि विदेका त्वममत्वका ।
का त्वं तु तेऽर्थं नावैमि मनसा विश्वसंनुते ॥ ४३ ॥

**अस्यार्थ**—हे देवि कामनानामकाऽभिलाषाभिधाना । तु पुनः । अममत्वका निर्ममा[1] [ विदेका त्वम् । ] का त्वम् । त्वित्यहो । हे विश्वसंनुते त इति तवाऽर्थं प्रयोजनं मनसा नाऽवैमि ॥

**गोमूत्रिकाबन्धो** यथा

गोपालाऽर्णोदनीलाभ[2] पाहि नारायण प्रभो ।
गोकुलानंदलीलाढ्य पावनाऽभयताप्रद ॥ ४४ ॥

स्पष्टोऽर्थः ॥ छ ॥[3]

[4]**हारबन्धो** यथा

द्याद्दानन्ददानं दनुतनुजतनुच्छेददक्षः स दक्ष-
ध्वंसी लोकाऽवलोकाकलिततनुतनुर्विश्वभावस्वभावः ।
यः कालापं कलापं[5] कलयति नियतिस्फीतधामाऽतिधामा
सर्वाकाशाऽवकाशात्मकरुचिररुचिर्दग्धमारः प्रमारः ॥ ४५ ॥

**अस्यार्थः**—विश्वभावस्वभावः[6] विश्वभाऽवः स्वभावः विश्वतेजोरक्षकप्रभावः[7] । कलापसम्बन्धिनं कलापं भूषणं कलयति । नियतेर्भाग्यस्य स्फीतधाम । प्रमां यथार्थाऽनुभवं राति ददाति प्रमारः ॥

**सर्वतोभद्रं** यथा

मायाभाववभाऽऽयामायात मान्यन्य मातया ।
भामासादद सामाभाऽवन्यदस्वस्वद न्यव ॥ ४६ ॥

---

१ B. Repeats निर्ममा.
२ A.—लीलाभ.
३ B. reads after this—गूमूत्रिकाबन्धो लिखितः ॥
४ A. reads before this—अथ.
५ B. repeats कलापं.
६ A—प्रभाव; ७. A.—स्वभावः.

**अस्यार्थः**[१]—मायाभावेन वभातीति मायाभाववभस्तस्य सम्बोधनम् । अत्राप्याद्यिल्य-कारलोपः । आयामेनाऽऽयात प्राप्त । मान्यन्य मानिष्वन्योत्कृष्ट । मां तयते पालयतीति तथा । अ विष्णो । भामासादद[२] भा कान्तिः, मा सम्पदसादोऽक्लेश एतान्ददाति स तथा । सामसु आभातीति स तथा[३] । सप्तसामोपगीत । अवनीमदन्तीत्यवन्यदस्ते च तेऽस्वाश्च वैरिणस्तेषां स्वं स्वरूपं द्यति खण्डयतीत्यवन्यदस्वस्वदः । तस्य सम्बोधनं तथा । न्यव नितरामव रक्षेति पदार्थः ॥

**अनुलोमप्रतिलोमं** यथा

चारुतेद्धशुभाकाराऽयि मानायतकामन ।
नमकातय नाऽमायि राकाभाशुद्ध ते रुचा ॥ ४७ ॥

[**अर्थः**]—अयीत्यहो । चारुतेद्धशुभाकार चारुतयेद्धश्चारुतेद्धः शुभ आकारो यस्य स तथा । [४]तस्य सम्बोधनम् । मानायतकामन मानेनाऽऽयता कामना मनोरथो यस्य स तथा[५] । नमकातय नमन्तीति नमकास्तानासमन्तात्तयते पालयतीति तथा । राकाभाशुद्ध पूर्णचन्द्रनिशाप्रभातुल्य । ते तव । रुचा नाऽमायि महत्त्वात्कुत्राऽपि नाऽवकाशोऽलभ्य-तेत्यर्थः ॥

**द्व्यक्षरं** [यथा]

नितान्तानूतनतनौ नेति(त)तान्तिततौ नतिम् ।
नानाऽऽननर्नुतेऽनन्ते तनुते नैति तं नतिः ॥ ४८ ॥

[**अर्थः**]—नितान्ताऽनूतनतनौ नितान्त अ(म)तिशयेनाऽनूतना पुराणा तनु-र्मूर्तिर्यस्य तस्मिन् । नेततान्तिततावप्राप्ततान्तिप्रताने । नानाऽऽननर्नुते नानाऽऽननैर्बहुमुखैर्देवैः स्तुते । एवं विधेऽनन्ते यो नतिं तनुते तं नतिर्नम्रता नैति नोपयाति ॥

दुर्व्याख्येयतया नोक्तं चित्रमेकाक्षरादिकम् ।
विलोकनीयास्तद्भेदाः **कविकौतूहलादिषु** ॥ ४९ ॥ छ ॥

इति श्रीमालकुल-श्रीमालभार-श्रीमालवमण्डलालङ्कार-**जीवनेन्द्र**नन्दन-मफरलमलिक-**श्रीपुञ्जराज**विरचिते **शिशुप्रबोधे काव्यालङ्कारे शब्दालङ्कारनिरूपणं** नाम **सप्तमो**ऽध्यायः ॥ छ ॥ ७ ॥

---

१ B. omits अस्य.
२ A. °साद corr. sec m. B. °साद.
३ B. repeats this sentence from सामसु to तथा.
४ to ५ A. sec. m. marg.

# [ अथाऽष्टमोऽध्यायः ॥ ]

## अथाऽर्थालङ्काराः[१] ॥

**जातिः** समाधिः( धि )संयोगाच्चमत्कारमुपेयुषी ।
पुष्णात्यर्थस्य सौभाग्यं सा मुख्याऽलङ्कृतिर्मता ॥ १ ॥

यथा

वक्षुश्चुम्बति वक्रतां वरतनोरानृत्यति भ्रूलता
रागं धीरवगाहते कुचयुगं तुङ्गत्वमालिङ्गति ।
प्रोन्मीलद्वलि मञ्चिमानमयते मध्यं कार्शिम्नो वशं
लावण्योर्मिलमं( मां )सलं च जघनं धत्ते गतौ मन्दताम् ॥ २ ॥

सौन्दर्यपुष्टिकृद्भूषाऽ**तिशयोक्ति**र्हि वस्तुनः ।
धर्ममात्रमलङ्कार्यं स्थितमुत्कृष्यते यया ॥ ३ ॥

**अलौकिकी लौकिकी** चे[२]त्येषा सत्कविवर्तिनी[३] ।
दृश्यते **द्विविधा** तत्र **प्रथमा** प्रतिपाद्यते ॥ ४ ॥

लोकस्थितिमतिक्रम्याऽतिरिक्तत्वं यदुच्यते ।
सम्भाव्यमानमर्थस्याऽ**लौकिकातिशयो** ह्यसौ ॥ ५ ॥

यथा

चन्दनार्द्रतनुरुज्ज्वलांशुका नव्यमौक्तिककलापशोभिता ।
चन्द्रिकासु शे( नि )शि कान्तमार्गगा लक्ष्यते न सहसाऽभिसारिका ॥ ६ ॥

अर्थस्य नियतो धर्मो नीयते यद्विपर्ययम् ।
लोकस्थितिमति[४]क्रम्याऽतिशयः सोऽप्य**लौकिकः** ॥ ७ ॥

तस्याऽनेकविधा भेदाः सत्काव्येषूपलक्षिताः ।
बालव्युत्पत्तये तेषु निदर्श्यन्तेऽत्र केचन ॥ ८ ॥

यथा

कलितललितवर्णव्यक्तिपत्रं लिखन्त्या
सपदि हृदि तया मेऽलेखि मूर्तिः स्वकीया ।

---

१ A. ०लङ्काराः
२ B. omits लौकिकी चे.
३ A.—वर्त्तनि B.—वर्त्तति.
४ B. मति repeated wrongly.

मनसि वचसि दृष्टौ वाऽद्य सैव स्थिता मे
दिशि विदिशि च सा सा जागरस्वप्नयोश्च ॥ ९ ॥

हरनयनानलकीलानिर्दग्धस्य स्मरस्य सहसाऽयम् ।
बलमुत्तेजयतितरां युवा नवामोदसुन्दर(रः) श्रीमान् ॥ १० ॥

कामानलः[१] स पश्चाज्ज्वलितः प्रागेव मे मनो दग्धम् ।
तद्दर्शनामृतेन स्मराग्निरुदपादि मे सपादि ॥ ११ ॥

तस्याः स्मितं हि पुष्पं मम हृदि तापः फलं विपुलम् ।
तन्वी सैव ममैका सम्प्रति सुखदुःख[२]कारणं जाता ॥ १२ ॥

तस्याः कटाक्षपाङ्क्तिर्जनिता पीयूषकालकूटाभ्याम् ।
सा मे मनसि वसन्ती क्षिपति दिदृक्षाभ्रमे चक्षुः ॥ १३ ॥

तदवेक्षणाऽनुरागो न माति बत मे शरीरान्तः ।
तद्विरहेण ममासीदमृतकरः प्रलयकालाग्निः[३] ॥ १४ ॥

तत्कान्त्यैव कृशत्वं लक्ष्यं न पुनर्वियोगजं तस्याः ।
लावण्यावृतनयनस्तदवयवान्नाऽवलोकितुं शक्तः ॥ १५ ॥

हारः सुवर्णसूत्रं भवति तदीयप्रभासमालिप्तः ।
तन्मुखसुधाकरो मां दूरस्थोऽपि स्फुटं दहति ॥ १६ ॥

इत्यादयोऽ**लौकिकाऽतिशयोक्ते**र्भेदाः स्वयमूह्याः ॥

अथ **लौकिकाऽतिशयोक्ते**र्भेदा **उपमा**दयो वक्ष्यन्ते ।

**लौकिकाऽतिशयो** लोकव्यवहारपुरःसरः ।
तमेव धर्मं येऽर्थस्य गमयन्ति मनोहराः ॥ १७ ॥

लौकिकाऽतिशयोक्तेस्ते भेदाः स्यु**रुपमा**दयः ।
वक्ष्यन्ते कतिचित्तेषु व्यक्तभेदाः परस्परम् ॥ १८ ॥

**तत्रोपमा**[१]ऽथ **सन्देहः**[२] **प्रतिवस्तूपमा**[३] **क्रमः**[४] ॥
**आक्षेपो**[५] **व्यतिरेक**[६]श्च **विरोधो**[७] **रूपकं**[८] **भ्रमः**[९] ॥ १९ ॥
**अप्रस्तुतस्तुतिः**[१०] **सौम्यं**[११] **समासोक्ति**[१२]**रपह्नुतिः**[१३] ।
**उत्प्रेक्षा**[१४]**ऽर्थान्तरन्यासो**[१५]**ऽनुमानं**[१६]**व्याजवर्णनम्**[१७] ॥ २० ॥

---

१ B. कामाललः (sic).

२ A. संप्रतिसुदुःख-.

३ A. -कालासिः corr. sec. m. marg.

**हेतुः**[१८] **सहोक्ति**[१९]**र्दृष्टान्तः**[२०] **परिवृत्ति**[२१]**रुदात्तता**[२२] ।
**पर्यायोक्तं**[२३] तथाऽ**न्योन्य**[२४] **मेकावलि**[२५]**र्विभावने**[२६] ॥ २१ ॥
**विरोधो**[२७] **दीपकं**[२८] **श्लेषः**[२९] **सङ्कीर्णं**[३०] **रसवत्त**था[३१] ।
काव्यस्यैते ह्यलङ्काराः कुर्वे तन्निर्णयं क्रमात् ॥ २२ ॥

गुणोत्कृष्टं प्रसिद्धं यदुपमानं तदुच्यते ।
तन्न्यूनमुपमेयं स्यादेतयोस्तुल्य**तोपमा** ॥ २३ ॥

**द्विधा पदार्थविषया वाक्यार्थविषये**ति सा ।
तत्राऽऽद्या **द्विविधा पूर्णा लुप्ता** चेति निगद्यते ॥ २४ ॥

धर्मोपमानोपमेयद्योतकैः **पूर्ण**तां व्रजेत् ।
धर्माऽऽदिलोपे **लुप्ता** स्यादुपमानपदे सति ॥ २५ ॥

तत्र **पूर्णा** यथा

नवपल्लवमिव बाले[1] करतलमरुणं तवाऽऽभाति ।

अत्राऽरुणत्वं धर्मः, नवपल्लवमुपमानं, करतलमुपमेयमिव शब्दो द्योतक इति सर्वसमुच्चयात्**पूर्णा पदार्थोपमा** ।

अथ लुप्तायाः पदार्थोपमाया उदाहरणानि ।

तत्र **धर्मलोपे** यथा

अमृतांशुरिवाननं भवत्या जघनाभोगभरालसं व्रजन्त्याः ।

**द्योतकलोपे** यथा

पाणितलं नवपल्लवताम्रं तावकमाकुलिताऽलकपङ्क्ते ।
केलिरसालतया जितखेदे कन्दुकघातमिदं सहते किम् ॥ २६ ॥

**गुणद्योतकयोर्लोपे** यथा

कमलनयना लज्जालोलं किमप्यवलोकते ।

सत्युपमाने**ऽन्येषां लोपे** यथा **महाकवेः**

तस्मिन्समावेशितचित्तवृत्तिमिन्दुप्रभामिन्दुमतीं विलोक्य ।

[ रघुवंश ६–७० पूर्वार्ध ]

अत्राऽऽह्लादकत्वं धर्मो वदनमुपमेयमिवशब्दो द्योतकः । एतेषां लोपे केवलमिन्दुप्रभेत्युपमानग्रहे **लुप्ता पदार्थोपमा** । न पुनरिन्दोरुपमानस्येन्दुमत्युपमेयं भवितुमर्हति

---

१ A. कशक्येत corr. sic. m. कथं शक्येत.

साधर्म्याऽभावात्कविसमयविरोधाच्च । न हि क्वचित्काव्यादौ स्त्रीचन्द्रमसोरुपमानोपमेयभावः । शक्येत[1] वा रूपकश्लेषादौ कथञ्चिन्निर्वोढुम् । इदं च न रूपकं न श्लेषः इन्दुप्रभेत्यत्र "तुल्यः प्रख्यः समः प्रभ "इति प्रभशब्दस्योपमानार्थत्वेनेन्दुप्रभेत्यनेनैवोपमा द्योतमानत्वात् । तस्माद्-ग्रहस्तेत्यादिवदवयवावयविनोर्भेदाभेदकल्पनया कदलकाण्डादिवत्सम्बद्धसम्बन्धेन वेन्दूपमासा-धर्म्यबलप्रतीयमानस्य मुखस्याऽप्रयोगेऽपीन्दुप्रभेत्यनेनेन्दुमुखीति गम्यते । इदं तु केवलमुप-मानग्रहे **लुप्तायाः पदार्थोपमायाः** स्वरूपमवसेयम् ।

## अथ वाक्यार्थोपमा ॥

एकवाक्यार्थता वाक्यार्थयोर्यत्रोपमावशात् ।
सा **वाक्यार्थोपमा** द्वेधेवशब्दसदसत्त्वतः ॥ २७ ॥

**इवशब्दसहिता** यथा **महाकवेः**

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥ २८ ॥

[ कु. सं. स. २. श्लो. २. ]

**इवशब्दरहिता** यथा

दयिताननं[2] ममान्तः सम्प्रति दृढभावनाघटितम् ।
तव मध्ये तु सुधाकरबिम्बं जीमूतगर्जितेनालम् ॥ २९ ॥

जात्यादिभेदा**दुपमा** भिन्नत्वमुपगच्छति ।
यथासम्भवमन्येष्वप्यलङ्कारेष्वयं क्रमः ॥ ३० ॥

**जात्युपमा** यथा

क्षत्रियवद्ब्राह्मणः क्वचित्क्रूरः ।

**द्रव्योपमा** यथा

कलशाविव स्तनौ ते तरुणि नमन्मध्यमे चकोराक्षि ।
आक्रान्तबाहुमूलावुन्मूलयतो ममाऽतिधीरत्वम् ॥ ३१ ॥

अत्र केवलमुपमानस्य द्रव्यस्याकृतिसाधर्म्या**दुपमा**त्वम् ॥

**गुणोपमा** यथा

असावलिरिव श्यामो रामो राजीवलोचनः ।
धनुर्बाणधरो[2] वीरः पुरः स्फुरतु मे सदा ॥ ३२ ॥

---

१ B. दयता°
२ B. धनोर्बाण° (sic).

अत्र केवलं गुणसाधर्म्याद्**उपमा** । अन्यथा हीनोपमात्वं प्रसज्येत ॥

**क्रियोपमा** यथा

रोषनिर्घृषितदन्तकान्तिभिर्बद्धवक्त्रपरिवेषभीषणान् ।
यातुधानपृतनापतीन्रणे मत्कुणानिव पिपेष मारुतिः ॥ ३३ ॥

अत्र मारुतेः प्रयासराहित्यातिशयद्योतिनी **क्रियोपमा** ॥

**उपमानसूचकाः** शब्दाः सन्ति काव्ये ह्यनेकशः ।
बालव्युत्पत्तये तेषु कतिचिद्व्याहरामहे ॥ ३४ ॥

स्वस्तिकपिहितकुचाया मन्मथ**सहब्रह्म**सौन्दर्य[१] ।
बिशभङ्गं मा भाङ्क्षी रति**सदृशो** दन्तपङ्क्तिकामस्याः ॥ ३५ ॥

**अनुकुरुते** चन्द्रमसं **द्वेष्टि** सुधां **जयति** पुण्डरीकरुचिम् ।
**निन्दति** मरालशोभा**माह्वयते** जाह्नवीं भवत्कीर्तिः ॥ ३६ ॥

इन्दो**र्मित्रं** वदनमलका **वैरिणः** षट्पदानां
चक्षु**श्चोरं** सरसिजरुचो **वादि** हास्यं सुधायाः ।
बिम्ब**प्रख्यं** किशलय**समं** दन्तवासोऽपि तन्व्याः
श्री**देश्यायाः** सरसबिशिनी**सन्निभं** बाहुयुग्मम् ॥ ३७ ॥

कुचौ कलश**देशीयावूरू** रम्भा[२]**सहोदरौ** ।
चरणौ पद्म**सुहृदौ** कुमुदश्री**सखा** नखाः ॥ ३८ ॥

नीहाराद्रिरुचो**ऽवधीरणमनध्यायः** सुधादीधितेः
पीयूषस्य **पिधान**माननवृत्तिः कर्पूरपूरश्रियः ।
क्षीराब्धे**रपवादपद्धतिरधिक्षेपः** फणीन्द्रद्युते-
र्जाह्नव्या **नवनिह्नव**स्तव यशोराशिर्जगत्येधते ॥ ३९ ॥

मुखस्येन्दु**र्वीप्सा** सरसिजवनं लोचनरुचेः
**सपर्यापर्यायः** करतलरुचेः पल्लवचयः ।
कुचद्वन्द्वस्योच्चैः कनककलशश्री**रुपकथा**
भ्रुवो**राभासः** स्यान्मदनधनुरीशानदयिते[३] ॥ ४० ॥

---

१ A. -सौंदर्य•

२ A. भंभा corr. sec. m. B. भंभा-( sic ).

३ B.-रीशानयिते ( sic ).

इत्यादिभिरुपमा व्यञ्जकशब्दैरवसेया[1] ।

अथ **केचित्**

उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ ४१ ॥

इत्युदाहरणीकृत्याऽ**भूतोपमा**ऽप्यस्तीति विचारयन्ति । तदयुक्तम् । अभूतस्याऽनिष्पन्नस्याऽसत्यस्य वा पदार्थस्योपमानत्वायोगात् । प्रसिद्धं ह्युत्कृष्ट[2]गुणमुपमानं यथा लक्ष्मीरिव वधूरियमिति सौभाग्यादिगुणोत्कृष्टस्य लक्ष्मीलक्षणस्योपमानस्य साधर्म्येण वधूलक्षण उपमेये कश्चिदतिशयः प्रतीयते । न तु तथा, यथा "गौस्तथा गवयो" "मम गौरिव गौस्तवे"त्यादौ भूष्यभूषणत्वाऽभावादुपमालङ्कारत्वं भवितु[3]मर्हति । अलङ्कारत्वं हि वस्तुनि शोभाऽतिशयाधानत्वादेवेति । प्रकृतेऽपि यस्मिन्मन्दाकिनीप्रवाहद्वयं पतत्येतादृशस्याकाशस्या[4]दृष्टत्वादागमादावश्रुतत्वादभाव एव । तस्मादसत उपमानस्य सतो[5]पमेयेन साधर्म्यविधानमयुक्तमित्युपमाभ्रान्तिर्न विधेया । किन्तु पूर्वोद्दिष्टाया **अलौकिकातिशयोक्ते**र्भेद एवेति मन्तव्यम् । यद्येवं तर्ह्युपमीयेतेति[6] यदिशब्दप्रयोगेणैव कविनोपमाभ्रान्तिर्निरस्ता । अलमतिप्रसङ्गेन ॥

## अथ सन्देहः

वक्तुं सादृश्यमुद्रिक्तमुपमानोपमेययोः ।
संशयः क्रियते योऽसौ **सन्देह** इति कथ्यते ॥ ४२ ॥
किंवाऽऽहोस्विदुतस्वित्किं किन्वादिपदजीवितः ।
अयं निबध्यते सुज्ञैः सदृशादिपदं विना ॥ ४३ ॥

यथा

किं स्विन्मुखं प्रियाया लुलितालकपङ्क्ति सरसि सम्भाति ।
आहोस्विन्नु सरोजं भ्रमराऽऽवलिसम्भृतश्रीकम् ॥ ४४ ॥
अभेदमुपमानस्योपमेयादवगच्छतः ।
भेदकृद्वचनं वक्तुः **सन्देहमपरे** जगुः ॥ ४५ ॥

---

१ A.—रवसेयाः.
२ A. from गुण to गुणोत्कृष्ट Sec. m. marg.
३ A. भवतुम् ( sic ).
४ A आकाशसस्या- corr. sec. m. B. आकाशसस्या- ( sic ).
५ A ०मानस्यासतो०
६ B ०पमेयेतेति ( sic ).

यथा

इन्दीवरं किंस्विदिदं मनोज्ञं तस्मिन्नहो भ्रूललितं कुतस्त्यम् ।
इत्थं प्रियाचक्षुषि मामकीनं मुहुर्मुहुः संशयमेति[1] चेतः ॥ ४६ ॥

नानोपमानरूपेणोपमेयं यदि शङ्क्यते ।
किं न्वित्यादिपदैस्तन्तु **सन्देहमपरे** जगुः ॥ ४७ ॥

यथा

किंस्विदयं **बलभद्रः** किं **वाली भीमसेनो** वा ।
किं **कालः** किमयं **शनि**रिति समरे शङ्क्यते स्म **रणमल्लः** ॥ ४८ ॥ छ ॥

## अथ प्रतिवस्तूपमा ।

वाक्यार्थौ साध्यदृष्टान्तौ स्यातां यत्र पृथक् पृथक् ।
प्रतीयमानसादृश्यौ **प्रतिवस्तूपमे**ति सा ॥ ४९ ॥

[ यथा ]

गुणवति कथमिव ताम्यसि चपलतया पत्युरन्यनारीषु ।
पद्माश्लेषरसालो नालिङ्गद्वल्लवीः किमङ्ग हरिः ॥ ५० ॥

यथा वा

नैकोऽपि त्वादृशोऽद्याऽपि जायमानेषु राजसु ।
ननु द्वितीयो नास्त्येव पारिजातमहीरुहः ॥ ५१ ॥

## अथोपमाक्रमः ।

उपमानोपमेयानां यः सम्बन्धो यथाक्रमम् ।
उच्यते स **क्रमो** धीरैः **सङ्ख्यान**मिति चाऽपरैः ॥ ५२ ॥

यथा

वदनविलोचनवचनस्मिताऽधरैस्ते विलासिनि प्रसभम् ।
चन्द्रेन्दीवरवीणाक्वणितसुधापल्लवानि जीयन्ते[2] ॥ ५३ ॥

## अथाऽऽक्षेपः ।

उपमेयसमुत्कर्षसिद्ध्यर्थं यो विधीयते ।
आक्षेप उपमानस्य त**माक्षेपं** प्रचक्षते[3] ॥ ५४ ॥

---

१ B. शंशयमेति ( sic ).

२ B. जीयते.

३ A. प्रचक्ष्यते

यथा

यदि तद्वदनं किमिन्दुना मे वचनं तद्यदि किं सुधारसेन ।
मिलिता यदि सा किमिन्द्रलक्ष्म्या किमपायेन यदस्ति तद्वियोगः ॥ ५५ ॥

यथा वा

किं सुधया यदि साधुः किं बत हालाहलेन पिशुनश्चेत् ।
किं कलिना यदि मदिरा किं निरयेणाऽन्यवशता चेत् ॥ ५६ ॥

उल्लिङ्घ्य प्रस्तुतं तच्च विशेषा( ष )कथनात्पुनः ।
आक्षिप्तमिव यत्र स्यात्तमाक्षेपं परे जगुः ॥ ५७ ॥

यथा

तावत्प्रतीक्षस्व वियोगभीतं चेतः समाश्वास्य वदामि यावत् ।
स्वामिन्निगाद्यं यदि वा तदास्तां प्रकाशये किं वचनेषु कृत्यम् ॥ ५८ ॥

यथा वा

जगति रतिपतेरहो महत्त्वं त्रिपुरहरेऽपि यदीदृशी दशासीत् ।
इदमवचनयोग्यमेवमास्तामुदधिपयःकलशोन्मितौ वयं के ॥ ५९ ॥

यथा वा

सुभग तव वियोगतो मृगाक्षी यदधिगतस्मरसञ्ज्वराऽचिकीर्षत् ।
अहह तदधुना कथं निगाद्यं धिगशकलीभवदाकुलं मनो मे ॥ ६० ॥

## अथ **व्यतिरेकः**

वाच्ये प्रतीयमाने वा सादृश्ये यत्पदार्थयोः ।
मुख्यस्याऽऽधिक्यकथनं **व्यतिरेकः** स कथ्यते ॥ ६१ ॥

**वाच्ये सादृश्ये** यथा

सत्यं तन्वि भवत्याः प्रसादलक्ष्मीमनोरमं वदनम् ।
पूर्णेन्दुना समानं किन्तु स दूष्यः कलङ्केन ॥ ६२ ॥

**प्रतीयमाने सादृश्ये** यथा

अकलितकलङ्कमदिवसधूसरमक्षीणभावमुपयातम् ।
वदनं शुचिस्मिते तव नवनव[1]माह्लादमाधत्ते ॥ ६३ ॥

## अथ **विशेषोक्तिः**

अभिन्नस्योपमेयेनोपमानत्वगुणच्युतिः ।
विशेष उच्यते यस्सा **विशेषोक्तिरु**दाहृता ॥ ६४ ॥

---

१ A. स्मितेनवनव॰ corr. sec. m. B. स्मितेन नवनव॰

यथा

अक्षीराम्बुधिमथनोद्भवममृतं त्वत्समागमः[१] कान्ते ।
हन्ति वियोगो नितरामनाश्रयाशः कृशानुस्ते ॥ ६५ ॥

गुणादिविकलस्यापि प्रस्तुतस्य यदुच्यते ।
कार्यशक्त्या समुत्कर्षो **विशेषोक्तिरसा**वपि ॥ ६६ ॥

यथा

उरो न गूढं कुचयोर्गरिम्णा गतिर्न मन्दा न च मन्थरा दृक् ।
वचो न वक्रं न रतिः प्रगल्भा तथाऽपि बाला तनुतेऽनुरागम् ॥ ६७ ॥

अथ **रूपकम्**

उपचारादभेदो य उपमानोपमेययोः ।
**तद्रूपक**मिति ख्यातमलङ्कारविचक्षणैः ॥ ६८ ॥

सुभग तवाऽऽननचन्द्रे( न्द्र )स्मितचन्द्रिकया विलासिन्या( न्याः ) ।
चक्षुःकुवलयमस्या मुदितं किरदश्रुमकरन्दम् ॥ ६९ ॥

यथा वा

वदनं सरोजमेतल्लोचनयुगलं च कुवलयद्वन्द्वम् ।
बाहू मृणाललतिके[२] काञ्चनकलशौ कुचावेतौ ॥ ७० ॥

अलङ्क्रियान्तरोत्पत्तिकारणस्य प्रशस्यते ।
अप्रतीतगुणस्याऽपि रूपकस्य परिग्रहः ॥ ७१ ॥

यथा[३]

लीलाललाटिकेव त्रिदिवविटस्योज्ज्वलाकारा ।
निर्मोकमुक्तिरिव या गगनमहाहेर्वियद्गङ्गा ॥ ७२ ॥

अत्र त्रिदिवस्य विटत्वारोपो गगनस्य महाहित्वारोपोऽप्रतीतगुणस्तथाऽपि लीलाललाटिकानिर्मोकमुक्तिरिवेति चोत्प्रेक्षालक्षणस्यालङ्कारान्तरस्य कारणत्वात्प्रशस्तः ॥ एवमन्यत्राऽपि ज्ञेयम् ॥

अथ **भ्रमः**

वस्तु किञ्चित्समालोक्य ज्ञाताऽन्यत्प्रतिपद्यते ।
तत्समं वस्त्वसन्दिग्धं यत्र स **भ्रम** उच्यते ॥ ७३ ॥

---

१ B. –गतः

२ A.—लतिके ( original ) corr. sec. m.—ललितौ,

३ B. omits यथा.

यथा

उत्तिष्ठन्ती शयनान्मदघूर्णितविलोचना मुग्धा ।
जालाऽऽगतमरुणांशुं विद्रुमयष्टिभ्रमादधत्त करे ॥ ७४ ॥

यथा वा

त्वयि पालयति क्षितिं क्षितीन्द्र क्रतुवृन्दोद्भवधूमशालिनीनाम् ।
ककुभामवलोकनेन धत्ते घनकालभ्रममध्वनीनवृन्दम् ॥ ७५ ॥

## अथाऽप्रस्तुतस्तुतिः

प्रस्तुतं किञ्चिदुल्लिङ्ग्योपमानं स्फुटमुच्यते ।
विगर्हिततया यत्र सा स्यादप्रस्तुतस्तुतिः ॥ ७६ ॥

यथा

अभ्रच्छन्न इवेन्दुरम्बुजवनच्छाया तुषारागमो-
न्मृष्टेव ग्लपितेव पल्लवरुचिर्ग्रीष्मातपोत्तापनात् ।
कर्णाङ्कूरमिवाऽन्यपुष्टलपितं रूक्षेव हेमच्छवि-
स्तन्वङ्गि प्रतिभाति मे नवलतालीलायितं निर्वृतम् ॥ ७७ ॥

**अप्रस्तुतप्रशंसा**ऽन्या प्रस्तुतोत्कर्षसिद्धये ।
स्तुवतोऽप्रस्तुतं यत्र वाक्यार्थः पर्यवस्यति ॥ ७८ ॥

यथा

भूयः समुच्छ्वसति मुक्तशिरोऽधिसाद
आश्लिष्यति प्रियतमामतिमात्रतुष्टः ।
कार्येषु च स्ववशतामुपयात्यहीशः
पृथ्वीभरं वहति ते **नृप पुञ्ज** बाहौ ॥ ७९ ॥

यथा वा

परिमृशति शराग्रं कार्मुके दृष्टिकोणं
क्षिपति करतलेन स्फालयत्यात्मबाहुम् ।
भुवनविजयशक्तोऽस्मीति दृप्तो रतीशः
स्पृशति सरसिजाक्ष्या यौवने गात्रलक्ष्मीम् ॥ ८० ॥

## अथ तुल्ययोगिताऽलङ्कारः

द्वयोर्यत्र गुणोत्कर्षतुल्ययोर्वर्णनीयता ।
तत्साम्यमुच्यते तुल्ययोगितेत्यपरे जगुः ॥ ८१ ॥

**एकक्रियान्विता भिन्नक्रियाऽनुक्तक्रिया** तथा ।
इति **त्रिधा** निगदिता काव्यज्ञैस्**तुल्ययोगिता** ॥ ८२ ॥

**एकक्रिया** यथा

पालयति क्षितिमखिलां विजिताऽरितया निराकुल( लः ) श्रीमान् ।
स्वामी भवान्नराणां दिवममराणामधीशश्च ॥ ८३ ॥

यथा वा **महाकवेः**

जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाऽधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥ ८४ ॥
[ र. वं. स. ५. श्लो. ३१. ]

**भिन्नक्रिया** यथा

वितरति वित्तं **पुञ्जो** जनतानयनोत्सवं वितन्वानः ।
उच्चैर्यथाभिलाषं वर्षति चाऽम्भोधरो वारि ॥ ८५ ॥

**अनुक्तक्रिया** यथा

विश्वं भरं वहत्येकः परो विश्वम्भराधरः ।
श्लाघ्या तेन तयोर्मैत्री विरोधो वा न वञ्चनम्[१] ॥ ८६ ॥

## अथ **समासोक्तिः**

उच्यमानमभेदेनोपमानं यदि केवलम् ।
युक्तं विशेषणैः सर्वैरुपमेयोपचारिभिः ॥ ८७ ॥
प्रस्तुतं गमयत्यर्थमनुक्तमपि यत्र सा ।
**समासोक्ति**रिति प्रोक्ता सूच्यार्थेषूपयोगिनी ॥ ८८ ॥

यथा

दृढमूलतया न कम्पनीयः परिपुष्णन्व्रजमार्थिनां फलौघैः ।
अयमेव महीरुहो महीयान्विपुलच्छाय उपाश्रयोचितो मे ॥ ८९ ॥

## [ अथाऽन्योक्तिः ]

इयमेव मताऽ**न्योक्तिः** पृथक्सर्वविशेषणम् ।
सममाचारमात्रेणोपमानं यदि वर्ण्यते ॥ ९० ॥

यथा

माकन्दद्रुममञ्जरीमधुमदामोदैकमेदस्विना
येनाऽलम्भि पयोजिनीषु मुकुलक्रीडाविनोदोत्सवः ।

---

१ A. वञ्चना.

सोऽयं सम्प्रति पर्यटन्मरुभुवि ग्रीष्मातपोत्तापितो
दुर्दैवात्समयं नयत्यविरतो भृङ्गोऽर्कपुष्पोदरे ॥ ९१ ॥

उपमानं भवेद्यस्यां भिन्ना[1]भिन्नविशेषणम् ।
समानं व्यवहारेण साऽप्यन्योक्तिर्मता सताम् ॥ ९२ ॥

यथा

दानं ददाति सरसाम्रकरः प्रसह्य
मञ्जानि तुङ्गतर[2]भूरुहकाननानि ।
सोऽयं मतङ्गजपतिर्वनसल्लकीनां
मञ्जु स्पृशन् किशलयानि तनोति केलिम्[3] ॥ ९३ ॥

अथाऽपह्नुतिः

वर्णनीयमपह्नुत्य किञ्चिदन्यत्प्रदर्श्यते ।
समं वाऽप्यसमं तस्य यदि साऽपह्नुतिर्मता ॥ ९४ ॥

**समाऽपह्नुति**र्यथा

नेदं नभोऽतिविमलं सर एव नायं
चन्द्रः समुल्लसति तन्नवपुण्डरीकम् ।
नेदं पुनः स्फुरति लक्ष्म मधुव्रतोऽयं
नो चन्द्रिका नभसि सान्द्ररजोऽवकीर्णम् ॥ ९५ ॥

**असमाऽपह्नुति**र्यथा

नाऽयं चन्द्रो वियोगिन्या अकालप्रलयाऽनलः ।
नायं रतिपतिः किन्तु क्रोधाध्मातः परेतराट् ॥ ९६ ॥

अथोत्**प्रेक्षा**

अन्यथाऽध्यवसानं यदतद्रूपस्य वस्तुनः ।
सो**त्प्रेक्षा** नाम सादृश्याऽसादृश्याभ्यां द्विधा मता ॥ ९७ ॥

तत्र **सादृश्यगर्भितोत्प्रेक्षा** यथा

तव तन्वि रोमराजी राजति सेयं समुद्गता नाभेः ।
अमृताऽऽलवालमध्यादुदिता सरलेन्द्र[4]नीलवल्लिरिव ॥ ९८ ॥

---

१ A. भित्त्वा. corr. sec. m. as भिन्ना. B. भित्त्वा.
२ B. -तरु-
३ A. केलीः
४ B. शरलेन्द्र-

**असादृश्यगर्भा** यथा

दिवं समाश्लेषयतीव भूम्या दिशस्तनूभिर्व्यतिशीव्यतीव ।
तमः समग्रान् ग्रसतीव शैलानद्वैतमासादयतीव दृष्टेः ॥ ९९ ॥

अभिन्नेनोपमानेन उ(तू)पमेयादपह्नुतात् ।

उद्भावनं क्रियादेर्यत्तामुत्प्रेक्षां परे विदुः ॥ १०० ॥

**क्रियोत्प्रेक्षणं** यथा

किंशुकमिषेण दहनस्तरुमारुह्योच्चकैररण्यानीम् ।
कियती मयाऽस्ति दग्धा कियत्यदग्धेव(ति) पश्यतीव मुहुः ॥ १०१ ॥

**गुणोत्प्रेक्षा** यथा

मन्ये सुधांशु[1]मण्डलकपटात्कन्दर्पचक्रस्य ।
वियुतवधूजनहृदयच्छेदनरुधिरेण शोणिमा जातः ॥ १०२ ॥

कल्पितेनोपमानेन स्तुत्यं चेदुपमीयते ।
यदि शब्दप्रयोगेन विनोत्प्रेक्षैव सा मता ॥ १०३ ॥

यथा **महाकवेः**

तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा[2] ।
साक्षादिव तपःसिद्धिर्बभासे[3] बहुरुन्धती ॥ १०४ ॥

[कु. सं. स. ६. श्लो. ११.]

यथा वा

तनीयस्युन्मीलच्छ्रमशिथिलभावोर्मिलुलिते
यदेतस्मिन्मध्ये मृदुनि वलिभङ्गीविलसितम् ।
तदुत्तुङ्गाभोगस्तनभरधृतिस्थैर्यविदितं
रते [:] पत्युर्मूर्तं परिणमति शक्तित्रयमिव ॥ १०५ ॥

यथा वा **महाकवेः**

राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥ इत्यादि ॥

[मे. दू. पू. मे. श्लो. ५८ चतुर्थपादः]

शब्दैर्मन्येध्रुवंप्रायःशङ्केनूनमिवादिभिः ।
उत्प्रेक्षा व्यज्यते सेयं प्रयोगेषूपलभ्यताम् ॥ १०६ ॥

---

१ A. शुधांशु- corr. sec. m. B. शुधांशु-.

२ A. -पादार्पितक्षणा.

३ A. बभाषे. corr. sec. m. B. बभाषे.

[ अथाऽर्थान्तरन्यासः ]

वाक्यार्थं प्रस्तुतं साध्यं यो हि साधयितुं क्षमः ।
वाक्यार्थोऽन्यः स उक्तोऽ**र्थान्तरन्यासो** विचक्षणैः ॥ १०७ ॥

**विश्वव्यापी विशेष**स्थ इति तस्य **द्विधा** गतिः ।
हिशब्दयोगाऽयोगाभ्यां द्वैविध्यं स्याद्द्वयोरपि ॥ १०८ ॥

**विश्वव्यापी हिशब्दसहितो** यथा

लग्नं जगदघहन्तुब्र( ब्र )ह्मकपालं हरस्यापि ।
शक्नोति कर्मबन्धं न हि वञ्चयितुं चराऽचरे कोऽपि ॥ १०९ ॥

**हिशब्दसहितो** यथा वा[1]

अम्भोजैस्तरलतरङ्गकेलिलोलैः
किञ्जल्कः कनकरुचिः समुच्छ्रितोऽपि ।
आवासं युवतिपयोधरेषु लेभे
नास्थानेऽपि हि गुणवानुपैति सादम् ॥ ११० ॥

**हिशब्दरहितो** यथा

गिलितं जगत्तमोभिर्न तु दीपस्य प्रधर्षणं विहितम् ।
तेजस्वी न तदन्यैः[2] परिभवितुं शक्यते काऽपि ॥ १११ ॥

धर्मः प्रस्तुतसिद्ध्यर्थं प्रस्तुतस्यैव कश्चन ।
अन्यवाक्यार्थतां याति स्या**द्विशेषस्थ** एव सः ॥ ११२ ॥

**हिशब्दसहितो** यथा **महाकवेः**[3]

स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।

[ र. वं. स. २. श्लो. ४. चतुर्थपादः ]

यथा वा **तस्यैव**

मुनिवनतरुच्छायां देव्या तया सह सि( शि )श्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥

[ र. वं. स. ३. श्लो. ७० उत्तरार्धः ]

---

१ B. omits hapl. from वा to हिशब्दरहितो यथा. ( after श्लो. ११० )

२ B. तदान्यः.

३ B. –कविः.

यथा च

तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभू-
न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥

[ र. वं. स. ७. श्लो. ७१ उत्तरार्धः ]

**हिशब्दरहितो** यथा

मरुच्चलत्पल्लववारितोऽपि भृङ्गो लतां पुष्पवतीमुपैति ।
मालिन्यभाजः समुदेति गम्याऽगम्यस्थले न भ्रमतो विवेकः ॥ ११३ ॥

इत्यादि ज्ञेयम् ॥

## अथाऽ**नुमानम्**

यदि केनाऽपि लिङ्गेन परोक्षं वस्तु गम्यते ।
पुष्टार्थमेव तत्प्रोक्त**मनुमानं** विभूषणम् ॥ ११४ ॥

यथा

कुटिलित[1]तरलाक्षीं कोपकम्पा[2]ऽधरोष्ठी-
मनभिमुखमुखेन्दुं दीपितभ्रूविकाराम् ।
कथयति पुनरेनां रागरज्यत्कपोल-
स्थल[3]पुलकविकाशश्चेतसा मे सम[4]ताम् ॥ ११५ ॥

यथा वा

विलुलदलकपाङ्क्तिं स्विन्नवक्त्रारविन्दा-
मपि विरहकृशाङ्गीमङ्गकान्त्यैव पूर्णाम् ।
भ्रमभृतमिव चक्षुर्मङ्क्षु दिक्षु क्षिपन्ती-
महमहह कुतश्चिच्छाङ्कितां तर्कयामि ॥ ११६ ॥

## अथ **व्याजोक्तिः**

अपकर्षमुपन्यस्य निन्दाऽऽभासः प्रदर्श्यते ।
अत्युत्तमां स्तुतिं कर्तुं यदि तद्व्या**जवर्णनम्** ॥ ११७ ॥

---

१ A. कुटुलत- ( sic ) B. कुटिलत- ( sic ).
२ A. कंप्राधरोष्ठी°.
३ B. omits. hapl. स्थल.
४ B. repeats समे, wrongly.

यथा

तापसोऽपि जमदग्नितनूजो यामिमां वसुमतीं निरजैषीत् ।
सा त्वया नृपतिनाऽपि जिता भूस्तत्पराक्रममदस्तव मा भूत् ॥ ११८ ॥

अथ **हेतुरलङ्कारः**

हेतोः पृथगुपन्यासो विशेषणतया तथा ।
वाक्यार्थसिद्ध्यै[1] यत्र स्यात्स **हेतुः** परिकीर्तितः ॥ ११९ ॥

**प्रथमो** यथा **महाकवेः**

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ १२० ॥

[ र. वं. स. १ श्लो. २४ ]

**द्वितीयो** यथा

चन्दनलताऽवसक्तद्विजिह्वगरलोष्मणा तीव्रः ।
सन्तापयति वसन्ते पथिकजनं मलयमारुतः सपदि ॥ १२१ ॥

यथा वा

वडवानलोग्रकीला[2]परिलीढकालकूटसहजन्मा ।
दोषाकरोऽयमुच्चैर्विरहवतीनां मनो दहति ॥ १२२ ॥

अथ **सहोक्तिः**

निष्पत्तिः प्रस्तुतार्थस्य समताऽसमताजुषा ।
कार्यान्तरेण सह या सा **सहोक्तिरु**दीरिता ॥ १२३ ॥

**सदृशसहोक्ति**र्यथा

जनतानेत्रवृन्दानि तरणावुदयोन्मुखे[3] ।
साकं सरोरुहवनैरवापुरपनिद्रताम् ॥ १२४ ॥

**असदृशा** यथा

कुसुमानि निपातयन्पृथिव्यां पथिकैः साकमुपात्तवेपथूनि ।
नमयत्ययमावलीस्तरूणां पवमानः सह मानिनीमनोभिः ॥ १२५ ॥

---

१ A. –सिद्धौ.

२ B. –काला– ( sic ).

३ A. –योन्मुख ( sic ).

अथ **दृष्टान्तः**

यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते ।
सामान्यधर्म( र्मः ) शास्त्रज्ञैः स **दृष्टान्तो** निगद्यते ॥ १२६ ॥

महीभृतोऽन्ये कति वा न सन्ति मेरोः पुनर्गौरवमन्यदेव ।
नृपाः पृथिव्यां बहवो वसन्ति भाग्यं तथाऽन्यादृशमेव **पुञ्ज** ॥ १२७ ॥

अथ **परिवृत्तिः**

सदृशाऽसदृशाभ्यां यत्क्रियते परिवर्तनम् ।
वस्तुनः सा तु विज्ञेया **परिवृत्तिर**लङ्कृतिः ॥ १२८ ॥

यथा **महाकवेः**

अशोकनिर्भर्च्छि( र्त्सि )तपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं[१] वसन्तपुष्पाभरणं वहन्ती ॥ १२९ ॥
[ कु. सं. स. ३. श्लो. ५३. ]

**विश( स )दृशपरिवृत्तिर्यथा महाकवेः**

विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥ १३० ॥
[ कु. सं. स. ५. श्लो. ८. ]

**अथोदात्तता**

उच्चैः समृद्धिमद्वस्तुवर्णनं स्या**दुदात्तता** ।
सामर्थ्ये जायते यत्र परमोत्कर्षचित्रता ॥ १३१ ॥

यथा

प्रत्यूषे मार्जयन्त्यो मणिभवनतलं हेमसम्मार्जनीभि-
र्वामाक्ष्यो यत्र मुक्तावलिपरिलुलितं सान्द्रपुष्पोपहारम् ।
स्रस्तैः कपू( र्पू )र खण्डैः शकलित तुहिनस्पर्धिभिः सार्धमेव
व्याकीर्णामोदचूर्णाऽवकरविरचिताऽवस्करेषु क्षिपन्ति ॥ १३२ ॥

अथ **पर्यायोक्तिः**

शब्दार्थवृत्तिव्यत्यासात्प्रकारेणाऽपरेण यत् ।
उच्यतेऽभिमतं वस्तु **पर्यायोक्तं** तदुच्यते ॥ १३३ ॥

---

१ A. sec. m. corr. सिंदुवार.

यथा

कमलाकठोरकुचसङ्गभङ्गुरा नखराङ्कुरा नरहरेर्जयन्ति ते ।
युधि ये हिरण्यकशिपोर्मृगीदृशां तिलकावनव्रतविसर्जनं व्यधुः ॥ १३४ ॥

[ अथाऽन्योन्यम् ]

भूष्यभूषणभावः स्यादन्योन्यं यत्र वस्तुनोः ।
सादृश्यमन्तरेणैव तद**न्योन्यं** विभूषणम् ॥ १३५ ॥

यथा **महाकवेः**

कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः ॥ १३६ ॥
[ कु. सं. स. १. श्लो. ४२ ]

यथा वा

रजनी [ स्तनयित्नु¹ ] भिर्विमुक्ता शशिना कामपि सन्दधाति शोभाम् ।
स च ता( तां ) समवाप्य कान्तिमाविष्कुरुते लोचनमोहिनीमतीव ॥१३७॥

## अथैकावली

प्राग्विशेषणपर्यन्तपदं यत्र विशेषताम् ।
उत्तरोत्तरतो याति वाक्य**मेकावली**ति तत् ॥ १३८ ॥

यथा

सलिलं विकसितकमलं कमलं सम्पन्नकेसरं पुरतः ।
केसरमपि विलुलन्मधु मधु सम्भृतषट्पदामोदम् ॥ १३९ ॥

अत्र विकसितकमलमिति प्राग्विशेषणं तस्य पर्यन्तपदं कमलं, तत्तूत्तरत्र विशेष्यम् । एवमुत्तरोत्तरं विशेषणपदानां विशेष्यत्वमिति ॥

## अथ **विभावनाऽलङ्कारः**

कार्यस्य निजमुत्सृज्य कारणं कारणान्तरम् ।
यत्र स्वाभाविकत्वं च विभाव्यं सा **विभावना** ॥ १४० ॥

यथा

अहिमागमरोमाञ्चमश्रमालसलोचनम् ।
अनुष्णोपगमस्विन्नमाननं ते विराजते ॥ १४१ ॥

---

१ A. तनयि * भिर्, B. तनयित्नभिर् ( both sic ).

अत्र रोमाञ्चादेः कार्यस्य हिमागमादि निजं कारणमुत्सृज्याऽनुरागलक्षणं कारणान्तरं विभाव्यमिति **विभावना** ॥

**यथा च**

अलिप्तपङ्किलहृदां खलानां सन्निधावपि[1] ।
अधौतशुद्धमनसो नैव सन्तो विकुर्वते ॥ १४२ ॥

अत्र स्वाभाविकत्वं विभाव्यमिति **विभावना** ॥

सत्यां कारणसम्पत्तौ कार्याऽनुत्पत्तिरूपिणीम् ।
अन्ये **विभावना**माहुरलङ्कारविचक्षणाः ॥ १४३ ॥

**यथा**

परिमलघूर्णितपवनं मधुलवसंसिक्त[2]पल्लवास्तरणम् ।
कुसुमलतागृहमेतत्सम्प्रति मनसो न हर्षाय ॥ १४४ ॥

अथ **विरोधः**

प्रस्तुतोत्कर्षसिद्ध्यर्थमर्थानां यः प्रदर्श्यते ।
विरोधाऽऽभास उदितो **विरोधः** स विचक्षणैः ॥ १४५ ॥

यथा

केलिकाननरसालमञ्जरीरेणुरेष मलयानिलोद्धतः ।
अस्पृशन्नपि वियोगिनीदृशोरातनोति नितरामुदश्रुताम् ॥ १४६ ॥

यथा वा

स्तनभरनमिताङ्गी त्वं विनम्रोऽहमस्मि
प्रतिवचनविकाशं (? सं) त्वं न धत्से जडोऽहम् ।
अलसगतिरसि त्वं नाऽपयातुं क्षमोऽहं
सुतनु तनुरसि त्वं हन्त कम्पाकुलोऽहम् ॥ १४७ ॥

अथ **दीपकम्**

प्रस्तुतौचित्यसम्बद्धैर्यद्वाक्यैः सह सङ्गतिम् ।
दधानं दीपयत्यर्थांस्तत्पदं **दीपकं** स्मृतम् ॥ १४८ ॥

तत्र **क्रियादीपकं** यथा

अलङ्करोति सुतनुं नवयौवनविभ्रमः ।
विचित्रकुसुमोल्हा( ल्ला )सो वसन्तः पुष्पवाटिकाम् ॥ १४९ ॥

---

१ B. सन्निधावति ( sic ).
२ A. संसिसिक्त. corr. sec. m. B. संसिसिक्त ( sic ).

यथा वा

त्यागेन लक्ष्मीर्विनयेन [1]विद्या सत्येन वाणी[2] विजयेन शक्तिः ।
भावेन भक्तिः सततं विभाति चन्द्रेण रात्रिर्भवता च पृथ्वी ॥ १९० ॥

यथा वा

निर्मलत्वमदुःखाय निर्विवेकत्वमागसे ।
सर्वभूतहितं शश्वदनातङ्काय जायते ॥ १९१ ॥

यथा वा

आरोग्यं वपुषि गृहेषु राजलक्ष्मीं
सद्भक्तिं मनसि वचस्सु सत्यमुच्चैः ।
कार्येषु प्रचुरपरोपकारितां च
प्रोत्साहं मम सुकृतोद्यमे विधेहि ॥ १९२ ॥

**कारकदीपकं** यथा

दुरितं हरति करोति श्रियं तनोत्युच्चकैः कीर्तिम् ।
सम्पादयति महत्त्वं रक्षति सत्त्वं प्रसादस्ते ॥ १९३ ॥

यथा वा

वर्णधर्मो द्विजातीनां योगिनां तत्त्वनिश्चयः ।
लोभिनामर्थसम्भारो वीराणां विजयः प्रियः ॥ १९६ ॥

पृथग्वाक्येषु संलग्नमेकमेव विशेषणम् ।
क्रियया दीप्यते यत्र तद्विशेषण**दीपकम्** ॥ १९७ ॥

यथा[2]

नवयौवना वधूटी नवकुसुमोल्लासिनी वसन्तश्रीः ।
नवरचना कविवाणी नवेन्दुलेषा( खा ) च कौतुकं तनुते ॥ १९८ ॥

यत्र दीपकसूत्रेण वाक्ये पुष्पाणि सत्कविः ।
बध्नात्यपूर्वविच्छित्त्या त**न्मालादीपकं** विदुः ॥ १९९ ॥

यथा

रूपं विभूषयति यौवनमस्य भूषा
लाव[3]ण्यमूर्जितमलङ्कृतिरस्य लीला ।
तां प्रेमनिर्भरमलङ्कुरुते मृगाक्षि ( क्षी )
तन्मण्डनं प्रियसमागमकेलिहर्षः[4] ॥ १६० ॥

---

१ A. from १ to २ sec. m marg.

२ Both read यथा वा.

३–४ A. from व ( २ ) to ह ( ३ ) sec. m. marg.

अथ श्लेषः

एकरूपमनेकस्मिन्नर्थे वाक्यं करोति यत् ।
प्रतीतिं निश्चिता[१]मेव स श्ले[२]षः स्यादनेकधा ॥ १६१ ॥

यथा

संरक्तमण्डलतया श्रियमादधानः
सल्लक्षणः कुवलयप्रियकान्तिपूरः ।
प्राप्तोदयो मृदुकरोल्लसनः कलाभि-
राह्लादनं नयनयोर्विदधाति राजा ॥ १६२ ॥

यथा वा

सर्वदानवबधूरतोत्सवं यस्य यच्छति सुदर्शनं वपुः ।
आयुधं नु नितरां निकृन्तति त्रायतां स वसुदेवनन्दनः ॥ १६३ ॥

**पद्श्लेषस्तु** यो वाक्यं न व्याप्नोति प्रगल्भते ।
औचित्यमुच्चकैः पोष्टुं श्र(स्र)ष्टुं वाऽलङ्क्रियान्तरम् ॥ १६४ ॥

तत्रौचित्यपोषकः [१]**पद्श्लेषो** यथा

संवृत्ते संवर्ते धरणीं धर्तुं भवाञ्शेषः ।
एवमालि निगृहीतसाध्वसं शङ्करो रहसि सेव्यतामिति ।
[कु. सं. स. ८. श्लो. ५ पूर्वार्धे].
रणे भीष्मं सहेत कः ।
दोषाकरोऽयमधिकं वितनोति तापम् ।
सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियया: ॥
[मे. दू. पू. श्लो. ७-१ पाद] इत्यादि[२] ।

**अलङ्कारान्तरोत्पादकश्लेषो** यथा

कुपतिमपि कान्तादयितं, गुणसम्पन्नमपि महादोषं, समानमप्यसमानं, सुनीति-मप्यनीतिम्, उदारकाममप्यनुदारकाममवनीपतिं ददर्श ।

यथा वा

अभिकमलं संश्रयते नरिसमूहं स नीचदग्विषयः ।
अघनतिमिश्रितवृत्तिर्बकोट इव दुर्जनो जगति ॥ १६५ ॥

---

१-२ A ता (१) to श्ले (२) sec. m. marg.
१-१ (Page 133) B. om. hapl. from पद to सहेत कः (१).
२ A. read इति afters इत्यादि.

अत्रो**पमोत्पादकत्वं श्लेष**स्य ॥

यथा वा

हरिरिव सत्यभा[1][मा]नुगतः, पुरन्दर इव नन्दनक्रीडारसिको, वरुण इव प्रचेता इत्यादि ॥

केचित्**पदश्लेषं यमकाऽनुप्रासादि**वच्छब्दालङ्कारं मन्वते । यतो राजा पुरन्दर इवेत्युपमायां नन्दनाख्य उद्याने क्रीडा, नन्दनानां पुत्राणां क्रीडेति च वाच्यभेदेन नन्दनक्रीडारसिकत्वस्य धर्मस्य साधारण्याऽभावात् । नाऽयं पदश्लेष उपमाख्यालङ्कार उपयुज्यते । किन्तु केवलं शब्दवैचित्र्याच्छब्दालङ्कार इत्युपपत्तिं दर्शयन्ति । तन्नेति केचित् । यतो हि नन्दनादिपदं भिन्नाऽभिधेयम् । तदुभयत्र श्लिष्यति[2] । न हि पुरन्दर इव शचीपतिरित्युक्ते श्लेषो भवितुमर्हति तस्मादिहाऽर्थद्वारैव **श्लेष उपमारू**पस्यालङ्कारस्योपकरोति । यथा नन्दनक्रीडारसिक इन्द्रस्तथा राजेत्यर्थद्वारैव नामख्यातिसाधर्म्यादुपमोपयोगी **श्लेषोऽर्थालङ्कारो वेदितव्यः** । **शब्दश्लेष**स्तु बन्धधर्मः । स **प्रागेव गुणनिरूपणे**ऽभिहितः । इत्यलमतिप्रसङ्गेन ॥

अथ **सङ्कीर्णालङ्कारः**

अङ्गाङ्गित्वेन बद्धानां समकक्षतयाऽथवा ।  
संसर्गोऽलङ्कृतीनां यस्तत्**सङ्कीर्णं** प्रचक्षते ॥ १६६ ॥

तत्राङ्गाङ्गितया **संसर्गो यथा महाकवेः**

अङ्गुलीभिरिव केशसञ्चयं सन्निगृह्य तिमिरं मरीचिभिः ।  
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥ १६७ ॥  
[ कु. सं. स. ८ श्लो. ६३ ]

यथा वा

हृदि चक्रवाक पततां तरणिर्निहिताऽभिता[3]प इव सौम्यरुचिः ।  
समरञ्जयत्सलिलराजदिशं न सुखावहा हि महिलोग्रतया ॥ १६८ ॥

अत्रोत्**प्रेक्षाश्लेषाऽर्थान्तरन्यासा**नामङ्गाङ्गी( ङ्गि ) भावः ।

**समकक्षतया** यथा

---

१ A. 'भा' sec m. marg.

२ A. श्लिष्यते.

३ A. भिता sec m. marg.

सुधावृष्टिरधारेयं लक्ष्मीरिव मनोरमा ।
विलासरेषा( खा ) मूर्तेव जीवितं मे कृशोदरी ॥ १६९ ॥

अत्र **विशेषोक्तिरु( षोत्तयु ) पमोत्प्रेक्षारूपकाणां समकक्षतया संसर्गः** ॥

वाच्याः सामर्थ्यलभ्याश्च ध्वन्यमाना ह्यलङ्क्रियाः ।
भवन्ति तासां **संसर्गो** दृश्यते कविवर्त्मनि ॥ १७० ॥

तत्र वाच्यसामर्थ्यलभ्ययोः ( योः ) **संसर्गो** यथा **महाकवेः**

तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं[1]
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः ॥ १७१ ॥

[ मे. दू. पू. मे. श्लो. ४१ ]

अत्र 'करधृतमिव प्राप्तवानीरशाखमि' त्युत्**प्रेक्षायाः**, 'सलिलवसनं मुक्तरोधोनितम्बमि'ति **रूपकस्य**, 'ज्ञातास्वादो विपुलजघनां को विहातुं समर्थ' इत्य**र्थान्तरन्यासस्य** च वाच्यानामलङ्काराणां सामर्थ्यलभ्यया **समासोक्त्या संसर्गः** ॥ छ ॥

**वाच्यध्वन्यमानयोः संसर्गो** यथा **महाकवेः**

स सैन्यपरिभोगेन गजदानसुगन्धिना ।
कावेरीं [2]सरितां पत्युः शङ्कनीयामिवाऽकरोत् ॥ १७२ ॥

[ र. वं. स. ४ श्लो. ४५ ]

अत्र[3] 'सरितां पत्युः शङ्कनीयामि[ वे ]त्यु' **त्प्रेक्ष( क्षा )या** ध्वन्यमानेन सैन्यस्याब्धिप्रतिमल्लतानिबन्धने**नोपमाल**ङ्कारेण सह **संसर्गः** ॥ एवमन्यदप्यूह्यम् ॥

अथ **रसवद्**लङ्कारः

अभासमानरसवद्वर्णनीयचमत्कृतिः ।
अर्थस्य दृश्यते यत्र **रसवत्त**द्विभूषणम् ॥ १७३ ॥

यथा

यामिनीनववधूः सुधाकरे सान्ध्यरागसिचयं विकर्षिति ।
आददे गगनतल्पसम्मिलच्चन्द्रिकोत्तरपटाऽवगुण्ठनम् ॥ १७४ ॥

---

१ B. –साखं.

२–३ A. form सरितां to अत्र sec. m. marg.

यथा वा

रागविभ्रमविलोलतारकां श्लिष्यतः प्रियतमां विभावरीम् ।
तत्तमोमृगमदाऽनुलेपनं लक्ष्म शीतकिरणस्य लक्ष्यते ॥ १७५ ॥

यथा वा

रोहिणीरमणविस्फुरत्करस्पर्शकोलिकालितस्मिताश्रियः ।
तारका दधति रात्रियोषितश्छिन्नहारगुणमौक्तिकभ्रमम् ॥ १७६ ॥

**समाहिता**ऽऽदयोऽप्यन्येऽलङ्काराः सन्ति भूरिशः ।
ते परस्परसङ्कीर्णा इति नोदाहृता इह[1] ॥ १७७ ॥

**भाव** एव हि लावण्यं सर्वस्या अर्थसम्पदः ।
त(य)या विना त्वलङ्कारा दृश्यन्ते निष्प्रभा इव ॥ १७८ ॥

अप्रधानतया स्वार्थं ब्रुवाणः श्लेषवर्जितः ।
शब्दो यत्राऽन्यमेवाऽर्थं गमयत्यस्तसंशयम्[2] ॥
स **भावः** कथ्यते **कैश्चिदन्यैर्ध्वनि**रिति स्मृतः ॥ १७९ ॥

**यथा**

कुसुमावचायरसिके सायं मा विहर सुभ्रु कुञ्जेषु ।
**शून्येषु[4] तेषु तमसाऽऽवृत्तेषु भवति ग्रहाभिभवः** ॥ १८० ॥

**अत्र सायं कुसुमावचयव्याजेन पुष्पवाटिकामुपैहि तत्र निर्जनेषु कुञ्जेषु प्रच्छन्नकामुको भवतीं स्वयङ्ग्रहाश्लेषेण गृहीत्वा मदनक्रीडाचण्डवेगैरभिभविष्यतीत्यन्य एवाऽर्थः** स्वार्थमप्रधानतया ब्रुवाणो श्लेषवर्जितैः शब्दैरस्तसंशयं[3] गम्यते ॥

कुत्रचित्ससन्देहमन्योऽर्थो व्यज्यते । तस्योदाहरणं यथा

असावतिप्रसन्नोऽपि नूनं चन्द्रस्तवाऽऽननम् ।
समानतां सरोजस्य नेतुं तन्वि समीहते ॥ १८१ ॥

अत्रोदिते चन्द्रे तवाऽऽननं विषादान्मलिनतामेष्यतीत्यन्यमर्थं या काचिदवबोध्यते[5] । साऽभिसारिका वा[6] विरहिणी वेति सन्दिग्धत्वम् ॥

अभिधेयमपह्नुत्य तद्विरुद्धप्रदर्शनात् ।
गम्यते कश्चिदन्योऽर्थः स **भावः कैश्चि**दुच्यते ॥ १८२ ॥

१ A. इतह correctd as इह. B. इतिह.
२–३ B. –शंशयं.
४ B. सून्येषु.
५ B. काचित्वबोध्यते.
६ B. om. वा.

यथा

नो माला(लां) न च चन्दनं न रुचिरं हारं वहामो वय
नो शुभ्रं कलयामहे निवसनं नो नूपुरौ दध्महे ।
तेन प्रोषितभर्तृकास्वपि दयामस्मासु सम्प्रत्ययं
धत्ते पञ्चशरस्तथाऽपि नितरां तारापतिर्बाधते ॥ १८३ ॥

अत्रोद्दीपनभावानां मालादीनां परिहारेण प्रोषितभर्तृकायामपि मयि मदनो दयां विधत्ते तादृङ् न पीडयतीति स्वैरिणीत्वमभिधेयमपह्नुत्य तारापतिर्बाधत इत्युक्तविरुद्धदर्शनादभिसारिकात्वं सम्यग्गम्यते ।

पदानां मुख्य एवाऽर्थो व्यनक्त्यर्थान्तरं हि यत् ।
उक्तनिर्वाहसिद्ध्यर्थं स **भावः** **कैश्चिदुच्यते** ॥ १८४ ॥

यथा

आक्रामति तव सैन्ये वेलापर्यन्तभूमिमवनीश ।
जलमभिनन्दति लवणं समदं तव हास्तिकं चाब्धिः ॥ १८५ ॥

अत्र 'लवणं जलं समदं हास्तिकं च समुद्रोऽभिनन्दती'त्येतस्यैव निर्वाहसिद्ध्यर्थं 'दैवेन क्षारत्वात्सैनिकपानस्नानादिभिर्न क्षीणोऽस्मि, तथा मदजलेन पङ्कीकृते रजसि न शुष्कोऽस्मी'-त्यर्थान्तरं मुख्योऽर्थ एव व्यनक्ति । तदिदं **भाव** इति ॥

सिद्धमन्यविरोधेन कथ्यते परथैव यत् ।
नामादि यत्र साकूतं स **भावः** **कैश्चिदुच्यते** ॥ १८६ ॥

यथा

साधवोऽमी न धरणीधरा न च पयोधयः ।
अहो कल्पान्तकालेऽपि [1]मर्यादा यैर्न मुच्यते ॥ १८७ ॥

अत्र साधूनामौन्नत्यमगाधत्वं च कल्पान्तेऽपि न हीयत इति **भावः** ॥

यथा वा

गत एव स समयः प्राग्यत्र सकृद्भवति कार्मुकं सज्जम् (ज्यम्) ।
सम्प्रति वारं वारं नृणां चापानि हतगुणानि[2] ॥ १८७ ॥

अत्र सकृदप्यारोपितेन धनुषा सर्वस्मिञ्जगति निर्वैरीकृते येषां पुनर्युद्धोद्यमाय धनुः-सज्जी(ज्यी)करणं न लगति ते त्वन्य एव वीराः । सम्प्रति प्रतिवेलमाजिसमारम्भं कुर्वाणा अपि नरा न[3] निर्वाणवैरा भवन्ति । साध्यसिद्धेरभावात् ॥ इति भावः ॥

---

१ B. om. hapl. from मर्यादा up to कल्पान्तेऽपि
२ A. हंतगुणानि. B. हंतनि (sic)
३ B. repeats न.

ऋजुमार्गतया सोऽयं **भाव**ः किञ्चित्प्रदर्शितः ।
**ग्रन्थान्तरे**ऽपि द्रष्टव्या तद्भेदानां[1] विकल्पना ॥ १८९ ॥

इति **काव्याऽलङ्कारः** सु(स)हृदयहृदयप्रमोदकरः ।
व्युत्पत्तये शिशूनामृजुबुद्धितया मयाऽभिहितः ॥ १९० ॥

## [ ग्रन्थकृत्प्रशस्तिः ]

आशान्तविश्रान्तयशा विशाल**श्रीमाल**वंशाभरणं बभूव ।
प्रशस्ततत्तद्गुणरत्नसिन्धु**र्देपाल**साधुः सुजनैकबन्धुः ॥ १ ॥

उर्व्यामुरव्ये(स्ये)षु गुणैर्गरीयान्निर्व्याजपुण्याचरणप्रवीणः ।
तस्माद**भूत्कोर** उदात्तचित्तः[2] कीर्तीन्दुसन्तोषितसच्चकोरः ॥ २ ॥

अभून्नन्दनस्तस्य **पामा**ऽभिधानः
कृपामादधानोऽर्थिनो योऽभ्यनन्दत् ।
नृपा[3] मानवन्तो यदीयोपकारा-
वनद्धाल्पामावहन्ति स्म चित्ते ॥ ३ ॥

मनीषिणामाश्रयणाय योग्यस्ततोऽभवद्वै**ष्णवधर्म**युग्यः ।
**गोवा**भिधानो भुवि भूरिभाग्यः सन्तोषितापन्नजनात्मवर्ग्यः ॥ ४ ॥

रामचन्द्रचरणाम्बुजसेवासावधानहृदयः सदयोऽभूत् ।
विश्रुतो जगति **पापच**[4]साधुः श्रीनिविधिनसमेधितबन्धुः ॥ ५ ॥

बभूवतुस्तस्य सुतौ यशस्विनौ महोदयौ **जीवनमेघ**मन्त्रिणौ ।
सतामपाकर्तुमजेयमान्तरं तमोऽवतीर्णाविव चन्द्रभास्करौ ॥ ६ ॥

मालवाऽधिपतिराज्यधुरीणे **मेघ**मन्त्रिणि निवेशितकार्यः ।
**जीवनो** जगति विस्तृतकीर्तिस्तानि तानि सुकृतानि ततान ॥ ७ ॥

तदीयौ सुतौ भाग्यशोभासमेतौ सुवृत्तौ **मकू**मातृगर्भप्रसूतौ ।
चिरञ्जीविनौ **पुञ्ज**[5]**मुञ्जौ** वदान्यौ गुणैरद्भुतैः सत्सु तोषं दधाते ॥ ८ ॥

---

१ B. द्रष्टव्याद्भेदानां (sic).
२ A. उदात्तः (om. hapl. त्तचि).
३ B. कृपा (sic),
४ A. पांपच-
५ B. repeats पुंज.

क्षोणीमण्डनमण्डपाभिधमहादुर्गोऽधिनाथोल्लस-
च्छ्रीमत्**साहिगयासदीनखलची**[1]राजेन्द्रचूडामणेः ।
यो मन्त्रित्वमुपेत्य सत्यवचनो विश्वं विवश्वा(स्वा)निव
व्याप्नोति प्रसभं प्रतापमहसा पद्मोदयोद्यत्करः ॥ ९ ॥

दधदपि परमेकः सर्वसौराज्यभारं
न हि भवति कदाचिद्व्याकुलः कार्यसिद्धौ ।
इति नृपति**गयास**स्वामिना स्नेहभाजा-
**न्मफरलमलिका**ख्या साधु यस्य व्यधायि ॥ १० ॥

**स पुञ्जराजः** सुकृती कृतज्ञो बिभर्ति वैदुष्यमहाप्रभुत्वे ।
वाग्देवता क्रीडति यन्मुखाब्जे पद्मालयामत्सरधारिणीव ॥ ११ ॥

तुलादिदानैर्दवयन् दारिद्र्यं विद्वदास्पदात्[2] ।
य आपन्नार्तिशमनैस्तनोति विमलं यशः ॥ १२ ॥
सोऽयं **श्रीपुञ्जनृपतिः** परोपकृतिकौतुकी ।
व्यधत्त काव्यालङ्कारं श्रोतृव्युत्पत्तिसिद्धये ॥ १३ ॥

इति श्रीमालकुलश्रीमालभारमालवमण्डलालङ्कार **जीवनेन्द्रनन्दन** मफरल–मलिक **श्रीपुञ्जराज**विरचिते **शिशुप्रबोधकाव्यालङ्कारेऽलङ्काराध्यायोऽष्टमः** ॥ ८ ॥ छ ॥

**[ समाप्तोऽयं शिशुप्रबोधकाव्यालङ्कारो नाम ग्रन्थः ]**

---

१ A. -षलची-
२ B. विद्वदास्यात् ( sic ).

# APPENDIX A

## **प्रशस्ति** at the end **सारस्वतप्रक्रियाटीका** of **पुञ्जराज.**[1]

इति प्रसन्नया वाचा विचिन्त्यार्थमसंशयम् ।
टीका सारस्वतस्येयं यथामति विनिर्मिता ॥ १ ॥

हिमालयादा मलयाचलं यो विशोभयामास महीं यशोभिः ।
आसीन्नृपालस्पृहणीयसम्पत् साधुः स **देपाल** इति प्रसिद्धः ॥ २ ॥

आर्येषु वर्यः परकार्यधुर्यः स्मर्यः सतां पौरसरोजसूर्यः ।
तत्सूनुरौदार्यनिधिर्बभूव **कोरा**भिधो दुर्हृदवार्यधैर्यः ॥ ३ ॥

सत्सेवितो ललितलक्षणकान्तमूर्तिराशाप्रसादनकरः सदनं कलानाम् ।
जैवातृकः कुवलयप्रथितोपकारः **पामा**भिधान उदियाय ततो नृसोमः ॥ ४ ॥

प्रथितविपुलश्रीः **श्रीमाला**न्ववायविशेषकः
सकलजगतीजाग्रत्कीर्तिः सुधीरनसूयकः ।
अमितविभवो **गोवा**साधुस्ततोऽजनि जानकी-
रमणचरणप्रेमानन्दादुदञ्चितसात्त्विकः ॥ ५ ॥

तत्सुतः सुकृतशोभितसंपत्प्रीणितावनिवनीपक आसीत् ।
वैभवेऽप्यविकृतो भुवि मूर्तः पुण्यराशिरिव **पापच**साधुः ॥ ६ ॥

अभूत् कुटुम्बस्थितिभारधारिणी **मदी** यदीया सहधर्मचारिणी ।
सदान्नदानव्रतदीक्षया जनं कुशेशयाकारदृशा पुपोष या ॥ ७ ॥

तन्नन्दनौ सुमतिसाधितपौरुषार्थावापन्निमग्नजनतोद्धरणे समर्थौ ।
ख्यातौ गुणैर्जगति **जीवनमेघ**सञ्ज्ञावाज्ञावशीकृतनृपौ सकृपावभूताम् ॥८॥

श्रीविलासवति **मण्डपदुर्गे** स्वामिनः **खलचिसाहिगयासात्** ।
प्राप्य मन्त्रिपदवीं भुवि याभ्यामर्जितोर्जितपरोपकृतिश्रीः ॥ ९ ॥

**जीवनो** भुवनपावनकीर्तिर्मन्त्रिभारमनुजे विनिवेश्य ।
ब्रह्मवित् स जगदीश्वरपूजाकौतुकेन समयं समनैषीत् ॥ १० ॥

नमदवनसमर्थस्तत्त्वविज्ञापनार्थः
सुजनविहिततोषः श्रीनिधिर्वीतदोषः ।

---

1 Acc. No. 4149; Oriental Institute, Baroda.

अवनिपतिशरण्यात् पौढधर्मा **मेघ**मन्त्री
**मफरलमलिका**ख्यां **श्रीगयासाद**वाप ॥ ११ ॥
पतिव्रता **जीवन**धर्मपत्नी धन्या **मकू**नाम कुटुम्बमान्या ।
श्री **पुञ्जराजा**ख्यमसूत पुत्रं **मुञ्जं** च तैस्तैश्चरितैः पवित्रम् ॥ १२ ॥
जयति मदनमुद्रः सज्जनः प्रेमसान्द्रः
सुगुणमणिसमुद्रः कीर्तिविद्योतचन्द्रः ।
नयविनयविनिद्रः पुण्यलक्ष्मीसमुद्रः
समरसमयरुद्रः **पुञ्जराजो** नरेन्द्रः ॥ १३ ॥
यस्याभाति सभा तिरस्कृतमदप्रह्वप्रभावोद्धुर-
क्षोणीमण्डनमण्डलेश्वरमहाराजन्यमान्यान्विता ।
विद्यावृन्दविनोदमोदविभवद्रोमाञ्चविद्वद्वचो-
जाग्रद्रूपसरस्वतीनिवसतिर्लक्ष्मीविलासायिता ॥ १४ ॥
अनुजे गुणवत्युदारचित्ते गुरुदेवद्विजभक्तिभाजि **मुञ्जे** ।
य उपाहितराजकार्यभारः प्रभुतासौख्यमनाकुलं बिभर्ति ॥ १५ ॥
रसोल्लसितया गिरा चतुरचित्तमानन्दयन्
कलासु सकलासु यः कलितकेलिकौतूहलो ।
विमत्सरतया दधन्निखिलशास्त्रतत्त्वज्ञतां
करोति करुणाकरोऽत्रनमनीषिसन्माननम् ॥ १६ ॥
प्रतिगृहमभिगम्य स्वर्णनिष्कान्विताना-
मुपचितकुतुकानां मोदकानां प्रदानैः ।
विदलितदुरवस्थान् लक्षसङ्ख्यान् गृहस्था-
नतुलितमहिमा यः क्षामकालेऽभ्यनन्दत् ॥ १७ ॥
अनिवारितवाञ्छितार्थदानैरतिदुर्भिक्षबुभुक्षयार्दितानाम् ।
गणशः समुपेयुषां जनानामकरोज्जीवितरक्षणं यदेकः ॥ १८ ॥
अनेकशो येन विधीयमानैस्तुलादिदानैरुपलब्धसम्पत् ।
विद्वज्जनो दीव्यति विन्दमानः श्रीभारतीसंनिधिसख्यसौख्यम् ॥ १९ ॥
विबुधानभिनन्दतो विपक्षक्षितिभृज्ज्ञातपराक्रमस्य यस्य ।
उदयद्युधि चापमाशु शंसत्यरिनारीनयनेषु भूरि वर्षम् ॥ २० ॥
योऽयं रुचिरचरित्रो गुणैर्विचित्रैरपि प्रसभम् ।
दिग्दन्तावलदन्तावलीवलक्षं यशस्तनुते ॥ २१ ॥

सोऽयं टीकां व्यरचयदिमां चारुसारस्वतस्य
व्युत्पित्सूनां समुपकृतये **पुञ्जराजो** नरेन्द्रः ।
गम्भीरार्थैरुचितविवृतैः स्वीयसूत्रैः पवित्रा-
मेनामभ्यस्यत इह मुदा **शारदा** सुप्रसन्ना ॥ २२ ॥

इति श्रीमालभारश्रीपुञ्जराजविनिर्मिता सारस्वतस्य टीका संपूर्णा ॥ श्रीः ॥

व्याख्याविशेषान्नयनप्रसङ्गाच्छ्रीपुञ्जराजो यदिहाभ्यधत्त ।
अविस्तरं चारु विनिश्चितार्थं सर्वं समूलं समपे( वे )क्षितं तत् ॥ २३ ॥
मुनियुगशरेन्दुवर्षे ( १५४७ ) श्रीपुञ्जविनिर्मिता महाटीका ।
सप्तशतलिखनपूर्वं संशोधिता कीर्तिविमलेन ॥ १ ॥

# APPENDIX B

## चित्रबन्धाः

### (१) पद्मबन्धः

[१]यादसा धृतनागे या यागेनाऽसुरजे तु या ।
यातुजे भीत्यमत्रेऽयायात्रे मय्यस्तु सा दया ॥




१ cf. p. ४७. श्लो. ४२

(२) चक्रबन्धः

[१]कामनानामका देवि ।विदेका त्वममत्वका ।
का त्वं नु तेऽर्थं नावैमि मनसा विश्वसंनुते ॥




१ cf. p. ४८. श्लो. ४३

## (३) गोमूत्रिकाबन्धः

[१]गोपालाऽर्णोदनीलाभ पाहि नारायण प्रभो ।
गोकुलानन्दलीलाढ्य पावनाऽभयताप्रद ॥



१ cf. p. ४८. श्लो. ४४.

## (४) हारबन्धः

[१]दद्यादान्ददानं दनुतनुजतनुच्छेददक्षः स दक्ष-
ध्वंसी लोकावलोकाकलितनुतनुर्विश्वभावः स्वभावः ।



१ cf. p. ४७. श्लो. ४५

यः कालापं कलापं कलयति नियतिस्फीतधामाऽतिधामा
सर्वाकाशाऽवकाशात्मकरुचिररुचिर्दग्धमारः प्रमारः ॥

## (९) सर्वतोभद्रम्

¹मायाभाववभायामायात मान्यन्य मातया ।
भामासादद सामाभावन्यदस्वस्वद न्यत्र ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| मा | या | भा | व | व | भा | या | मा |
| या | त | मा | न्य | न्य | मा | त | या |
| भा | मा | सा | द् | द् | सा | मा | भा |
| व | न्य | द् | स्व | स्व | द् | न्य | व |
| व | न्य | द् | स्व | स्व | द् | न्य | व |
| भा | मा | सा | द् | द् | सा | मा | भा |
| या | त | मा | न्य | न्य | मा | त | या |
| मा | या | भा | व | व | भा | या | मा |

APPENDIX C

Index of the Verses quoted from the works of Kālidāsa.


| श्लोकादिः | तत्स्थानं कालिदासीये | पृष्ठमस्मिन् |
|---|---|---|
| अङ्गुलीभिरिव | कु. सं. स. ८. श्लो. ६३ | ७१ |
| अथ नयनसमुत्थं | र. वं. स. २. ,, ७५ प्र. पाद. | ३२ |
| अथ स विषय- | र. वं. स. ३. ,, ७० | २७ |
| अपि तुरगसमीपाद् | र. वं. स. ९. ,, ६७ | ३१ |
| अशोकनिर्भर्त्सित- | कु. सं. स. ३. ,, ५३ | ६६ |
| अस्त्युत्तरस्यां दिशि | कु. सं. स. १. ,, १ | २७ |
| अस्याङ्कलक्ष्मीर्भव | र. वं. स. ६. ,, ४३ | ३१ |
| आस्वादवद्भिः कवलैः | र. वं. स. २. ,, ५ | ३२ |
| कण्ठस्य तस्याः | कु. सं. स. १. ,, ४२ | ६७ |
| गाहन्तां महिषा | अ. शा. अं. २. ,, ६ | ५ & ३७ |
| गुर्वर्थमर्थी | र. वं. स. ५. ,, २४ | ३० |
| ग्रीवाभङ्गाभिरामं | अ. शा. अं. १. ,, ७ | ४ |
| चतुर्वर्गफलं | र. वं. स. १० ,, २२ | ३९ |
| जनस्य साकेत- | र. वं. स. ५. ,, ३१ | ६० |
| तत्तद्भूमिपतिः पत्न्यै | र. वं. स. १. ,, ४७ पूर्वार्ध | ४० |
| तदुपहितकुटुम्बः | र. वं. स. ७. ,, ७१ उत्तरार्ध | ६४ |
| तस्मिन् समावेशित- | र. वं. स. ६. ,, ५० पूर्वार्ध | ५२ |
| तस्याः किञ्चित्करधृतमिव | मे. दू. पू. मे. ,, ४१ | ७२ |
| तेषां मध्यगता साध्वी | कु. सं. स. ६. ,, ११ | ६२ |
| ते हिमालयमामन्त्र्य | कु. सं. स. ६. ,, ९४ | ३१ |
| ददौ सरःपङ्कजरेणु- | कु. सं. स. ३. ,, ३७ | ५ |
| दर्भाङ्कुरेण चरणः क्षत | अ. शा. अं. २. ,, १२ | ३ |
| दशरश्मिशतोपमद्युतिं | र. वं. स. ८. ,, २९ | ४७ |
| न संयतस्तस्य बभूव | र. वं. स. २. ,, २० | ३५ |
| पत्युः शिरश्चन्द्रकलाम् | कु. सं. स. ७. ,, १९ | ४१ |
| प्रजानां विनयाधानाद् | र. वं. स. १. ,, २४ | ६५ |
| प्रियानुरागस्य मनः- | र. वं. स. ३. ,, १० | ३२ |

| | | |
|---|---|---|
| वाष्पायमाणो बलिमन् | र. वं. स.१४. श्लो. १९ उत्तरार्ध | ३९ |
| मनीषिताः सन्ति गृहेऽपि | कु. सं. स. ५. ,, ४ | २८ |
| मुनिवनतरुच्छायां | र. वं. स. ३. ,, ७० उत्तरार्ध | ६३ |
| राशीभूतः प्रतिदिशमिव | मे. दू. पू. मे. ,, ५८ चतुर्थपाद | ६२ |
| वसिष्ठधेनोरनुयायिनं | र. वं. स. २. ,, १९ | ३४ |
| विमुच्य सा हारमहार्य- | कु. सं. स. ५. ,, ७ | ६६ |
| विवृण्वती शैलसुताऽपि | कु. सं. स. ३. ,, ६ | ५ |
| व्रताय तेनानुचरेण धेनोः | र. वं. स. २. ,, ४ प्रथमपाद | ४० |
| स दक्षिणापाङ्गनिविष्टमुष्टिं | कु. सं. स. ३. ,, ७० | ३६ |
| स सैन्यपरिभोगेन | र. वं. स. ४. ,, ४५ | ७२ |
| स्वयं विशीर्णद्रुमपर्ण- | कु. सं. स. ५. ,, २७ | १७ |
| स्ववीर्यगुप्ता हि मनोः प्रसूतिः | र. वं. स. २. ,, ४ चतुर्थपाद | ६३ |

# ERRATA

| Pages | | अशुद्ध | शुद्ध |
|---|---|---|---|
| १ | ( श्लो. २ द्वि. पाद ) | व्कर्त्तीकृत. | व्यक्ती° |
| ,, | After श्लो. २, first line | यथा | मया |
| ६ | अ. २ श्लो. १ | स्त्री िम् | स्त्रीणाम् |
| १० | श्लो. २१. l. 1. | प्रकॢत्पार्थ | प्रकॢप्तार्थं |
| ७० | After श्लो. २१ . 1. | प्रकॢत्पार्थत्वम् | प्रकॢप्तार्थत्वम् |
| ७२ | F. n. 2. | B. मद्यव° | B. मघव° |
| ,, | ,, | B. Above...मद्यवि° | A. above...मघविं |
| १३ | F. n. 2 | B. सेफा° | to be dropped. |
| १४ | श्लों. ६० l. 2. | °न्ययौवो° | °न्यथैवो° |
| १५ | l. 16. | पत्र– | पद्म– |
| १६ | श्लो. ४ l. 2 | °नाजघ्र | °नाजघ्रे |
| १७ | F. n. 1. | B. व. B. च. | A. च. B. व. |
| २१ | l. 4. | मन्द्राक्रान्तायां | मन्दा° |
| २४ | l. 22. | अपोक्षेण्युपमा | अपेक्षिण्युपमा. |
| ,, | F. n. 6. | B. पेक्षण्युपमा | B. अपेक्षण्युपमा. |
| ३१ | l. 18. | साभि प्रायता | साभिप्रायता. |
| ,, | F. n. 1 | sec. | sec. m. |
| ३३ | श्लो. १५ | °मुदाहतम् | °मुदाहृतम् |
| ३४ | श्लो. २१. l. 2. | पक्ष्मपङ्कि– | पक्ष्मपङ्क्ति– |
| ३७ | श्लो. ३६. l. 3. | वयस्याहास्य– | वयस्या हास्य– |
| ,, | l. 5. | मधुञ्जमर्या– | मधुमञ्जर्या– |
| ३८ | l. 2. | –द्वैवस्वस्या– | –द्वैवस्वतस्या– |
| ,, | l. 13. | असमासा यथा ] | [ असमासा यथा ] |
| ३९ | l. 2. | –च्छोचनीत्व– | –च्छोचनीयत्व– |
| ४० | l. 13. | स. श्लो. ४. | स. २. श्लो. ४. |
| ४३ | l. 4 | सम्तोषो– | सन्तोषो– |
| ,, | l. 15. | वाहनं | वाहनं [ यस्याः तां ] |
| ,, | l. 22 | –तुल्ययामया– | –तुल्यया मया– |
| ४४ | l. 5. | प्रोप्नोमि | प्राप्नोमि. |
| ,, | l. 10. | सर्वदातारंम् | सर्वदातारं |

| | | | |
|---|---|---|---|
| ४४ | l. 20 | ओमादेना– | आमोदनः– |
| ४५ | l. 5. | राधनं | रा धनं |
| ,, | l. 6 | वदन्ती– | वदन्ती– |
| ४६ | l. 15 | विहिता [३]व– | विहिता[३] व– |
| ४७ | l. 6. | ॥ ३६ ॥ | ॥ ३५ ॥ |
| ४७ | श्लो. ३९. l. 1. | जिघांमुः | जिघांसुः |
| ४८ | श्लो. ४३ l. 2 | का त्वं तु | का त्वं नु |
| ,, | l. 7 | त्विल्यहो | न्वित्यहो |
| ४९ | l. 1. | अवाप्यारि– | अवाप्योरि– |
| ५० | श्लो. २ l. 1. | वक्षु– | चक्षु– |
| ,, | श्लो. ६. l. 1. | –रुज्ज्वललांशु– | रुज्ज्वलांशु– |
| ५१ | श्लो. १९, l. 2 | विरोषो | विरोधो |
| ,, | श्लो. २०. l. 1. | सौम्यं | सौ[ सा ]म्यं |
| ५२ | F. n. 1. | sic. | sec. |
| ५३ | l. 20. | कश्चित्करः | कश्चित्क्रूरः |
| ५४ | l. 19. | –माननवृत्तिः | –माननवृतिः |
| ५५ | After श्लो. ४१. | | add [शि. व. स. ३ श्लो. ८] |
| ५५ | l. 5. | –ऽप्यरत्तीति | –प्यस्तीति |
| ,, | ,, | विचारयर्न्ति | विचारयन्ति |
| ,, | श्लो. ४५ l. 2. | वक्तः | वक्तुः |
| ५६ | श्लो. ४८ l. 1 | किंस्वियं | किंस्विदयं |
| ५६ | श्लो. ५३. l. 1. | –स्मिताऽधरेस्तें | –स्मिताऽधरैस्ते |
| ५७ | श्लो. ६४. l. 2. | विशेषेक्ति– | विशेषोक्ति– |
| ५८ | श्लो. ६६. l. 1 | गूणादि– | गुणादि– |
| ५९ | श्लो. ८१. l. 2 | तत्साम्य– | तत् साम्य |
| ६२ | l. 25. | चतुर्थपादः | चतुर्थपादः ] |
| ६३ | श्लो. ११०. l. 2 | किञ्जकः | किञ्जल्कः |
| ६६ | श्लो. १३२. l. 3. | कपू (र्पू)र खण्डेः | कपू( र्पू )रखण्डैः |
| ,, | ,, l. 4 | शकलित तुहिन– | शकलिततुहिन– |
| ६९ | l. 20. | यथा[२] | यथा[३] |
| ,, | l. 27. | लाव[३]ण्य– | लाव[४]ण्य– |
| ,, | l. 29. | हर्षः[४] | ह[५]र्षः |
| ,, | F. n. | २ | ३ |
| ,, | F. n. | ३-४. A from व ( २ ) to ह ( ३ ). | ४-५ A. from व ( ४ ). to ह ( ५ ) |

| | | | |
|---|---|---|---|
| ७० | l. 14. | [१]पद्– | [३]पद्– |
| ,, | l. 18. | सहेत कः | सहेत कः[४] |
| ,, | l. 21. | इत्यादि[२] | इत्यादि[५] |
| ,, | l. 24. | –मवनपितं | –मवनीपतिं |
| ,, | fi. n. | १-१ (Page 133) B. om...(१) | ३-४ B. om ...(l. 18). |
| ७० | F. n. | २. A.read इति afters | ५. A. reads after |
| ७२ | श्लो. १७३ l. 1. | अभास– | आभास– |
| ,, | श्लो. १७४ l. 1 | विकर्षिति | विकर्षति |
| ७३ | श्लो. १८० l. 2 | –ऽऽ वृत्तेषु | –ऽऽवृतेषु |
| ,, | F. n. | २-३ B.—शंशयं | २, ४ B. शंशयं |
| ,, | F. n. | ४ B. सून्येपु. | ३ B. सून्येषु. |
| ७४ | l. 1. | वय | वयं |
| ७५ | श्लो. ६. l. 2 | -ऽवतीवर्णाविव | –ऽवतीर्णाविव. |
| ७८ | श्लो. १६. l. 2 | –कौतूहलो। | –कौतूहलः ! |